BHAASA NATAKA CHAKRAM

CHARUDATHAM

(Under the Project of Content Generation with a view to develop
E-Databank, E-Learning and E-Sources of Sanskrit Text.)

Chief Director

Prof. RADHA VALLABH TRIPATHI
Vice Chancellor

Director

Prof. K. T. MADHAVAN
Principal, Rashtriya Sanskrit Sansthan, Guruvayoor Campus

National Coordinator

Dr. SHUKLA MUKHERJEE
Project Officer
(RSKS,New Delhi)

Coordinator

Dr. E. M. RAJAN

Asst. Coordinator

Dr. P. INDIRA
Department of Sahitya
Rashtriya Sanskrit Sansthan,
(Deemed University)
Guruvayoor Campus, Puranattukara

भास्सनाटकचक्रम्

चारुदत्तम्

भारतसर्वकारस्य योजना (Content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)

प्रधाननिदेशकः

आचार्य राधावल्लभत्रिपाठी

कुलपतिः

निदेशकः

आचार्य के.टि. माधवः

प्राचार्यः, गुरुवायूर् परिसरः

राष्ट्रियसंयोजिका

डा. शुक्ला मुखर्जी

परियोजनाधिकारी

राष्ट्रिय संस्कृत संस्थानम्, नवदेहली

प्रधानसंयोजकः

डा. इ. एम्. राजन्,

परिसरसाहित्ययविभागाध्यक्षः, गुरुवायूर् परिसरः

उपसंयोजिका

डा. पि. इन्दिरा

राष्ट्रिय संस्कृत संस्थानम्,

(मानित विश्वविद्यालयः)

गुरुवायूर् परिसरः पुरनाट्टुकरा।

आमुखम् - ।। चारुदत्तम् ।।

महाकवेर्भासस्येदमन्तिमं नाटकम्। यतो ह्यीदं संपूर्णं न लिखितं भासेन। चारुदत्तं लौकिकम् इतिवृत्तम् अस्ति। अस्मिन् चत्वार अङ्काः वर्तन्ते। स्थापनायां नटः प्रविशति। सोऽतीव बुभुक्षित इति गृहं गच्छति। नटी नटं वदति यदद्याभिरूपपतिर्नामोपवासः अतः कश्चित्ब्राह्मणः भोजनीय इति। नटः विदूषकं दृष्ट्वा भोजनार्थमा ह्वयति। परं विदूषकः न स्वीकरोति।

प्रस्तावनानन्तरं विदूषकः प्रविशति। यद्यपि विदूषकस्य सखा चारुदत्तस्तथापि तं त्यक्तुं विदूषकः नाभिलषति। षष्ठी तिथिरिति देवबलिं विधातुं सः पुष्पाण्याहरति। पुनः दासी रदनिकाऽपि तत्र प्रविशति। चारदत्तस्य दारिद्र्ये दुःखं नास्ति परन्तु दारिद्र्यात् सज्जनास्तं त्यजन्ति। तत्रैव दुःखम्। तथापि दुःखमनुभूय सुखं शोभते ।।

शकार-विटाभ्यामनुगता गणिका वसन्तसेना आगच्छति। गहनान्धकारा रात्रिः। तामभिसर्तुं द्वौ वाञ्छतः। शकारोऽत्यस्ति धूर्तः। गमन मार्गे चारुदत्तस्य गृहम्। अन्धकारे वसन्तसेना कवाटे अन्तर्दधाना तिष्ठति। चारुदत्तः बलिं विधातुं विदूषकं रदनिकाञ्च चतुष्पथे प्रेषयति। विदूषकस्य हस्ते दीपोऽस्ति। वसन्तसेना दीपप्रभां नाशयति। विदूषकः पुनः दीपं प्रज्वालयितुं अन्तर्गच्छति। तदानीं वसन्तसेनाऽप्यनुगच्छति। विटः शकारश्च बहिस्तिष्ठन्तीं रदनिकां वसन्तसेनेति चिन्तयतः। अतः तौ तां गृह्णातः। विदूषको दीपेनागच्छति। तौ रदनिकां ज्ञात्वोन्मुच्य क्षमां पृच्छतः। चारुदत्तोऽन्तर्विद्यमानां वसन्तसेनां बलिकार्यं पृच्छति। सा मौनमाचरति। विदूषक आगत्य सर्वं वृत्तान्तं श्रावयति। वसन्तसेना तस्करेभ्यो भीताऽऽभरणानि गोपायितुं चारूदत्तस्य ददाति।

वसन्तसेना चेटी च मिथः वार्तालापं विदधतः। वसन्तसेना चारुदत्तेऽनुरक्तेति वदति। एकः पुरुषः वसन्तसेनागृहम् आगछति। सः पाटलीपुत्रनिवासी कश्चिन् वणिक्, दौर्भाग्यात् संवाहको जातः। उज्जयिनी नगरी धनाढ्येति अत्रागना चारुदत्तस्यापि संवाहको भवामि। वसन्तसेना तस्मै धनं दत्वा पुनः चारूदत्तस्य सेवां कर्तुं वदति। चेटः प्रबिशति। स वदति राजमार्गे कश्चिद्गजः कञ्चन परिव्राजकं गृहीतवान् इति। सर्वे भीताःकिन्तु सः शुण्डां गृहीत्वा ततः मुक्तो बभूव।

चारुदत्तस्य गृहे रात्रौ चारुदत्तः वीणायाः प्रशंसां विधत्ते। चारुदत्तो वदति - निद्रा नागछति अष्टम्यां चन्द्रास्तमयसमयः। तस्मिन् समये निद्राया उपक्रमो जायते। चेटी वसन्तसेनायाः आभरणानि विदूषकस्य दातुं वाञ्छाति प्रथमं विदूषकः तिरस्करोति। किन्तु अन्ते स्वीकरोति सर्वे स्वपन्ति सज्जलकाख्यश्चोरः

चारुदत्तस्य गृहं प्रविशति विदूषकः सुवर्णभाण्डस्य चौर्य स्वप्ने दृष्ट्वा सुवणभाण्डं दीयतामिति वदति। सज्जलकः सुवर्णभाण्डं दृष्ट्वा तद्गृहीत्वा गछति। अन्येद्युः सुवर्ण भाण्डमदृष्ट्वा सर्वे खिन्नाः, चारूदत्तस्य पत्नी स्वीयं शतसहस्रमूल्यां मालां वासवदत्तायै दातुं अर्पयति। चारुदत्तः तां स्वीकृत्य वासनदत्तायै दातुं विदूषकस्य हस्ते ददाति।

चेटी आगत्य काञ्चनमालां वासवदत्तायै दत्वा मात्रा दत्तेयामिति वदति। अपि चैतां धृत्वा यानेन राजश्यालकस्य समीपमागन्तव्यम्। वसन्तसेना तिरस्करोति। सज्जलकस्तत्रागच्छति। सः सदनिकायाः कामुकः। स आभरणानि चोरितानि तस्यै दातुम् उद्युङ्क्ते। मदनिकाऽऽभरणानिज्ञात्वा वसन्तसेनायै दातुं वदति। विदूषक आगछति। सः चारुदत्तेन दत्तां मालां वासवदत्तायै ददाति। विदूषकस्य गमनानन्तरं मदनिका सज्जलकन्तत्रानयति। मदानिकाऽऽभरणानि सर्वं वृत्तान्तमुक्त्वाऽऽभरणानि प्रत्यर्पयति। वसन्तसेना मदानिकान्तेराभरणैरलङ्कृत्य सज्जलकाय ददाति। द्वौ वासवदत्ताया दत्तेन यानेन गच्छतः। वासन्तसेना चतुरिकां चेटीमाह्वयति वदति अभिसणे उचितस्समयोऽयमिति। वासवदत्ता परिहासेन वदति यत्त्वं मम कामं उद्दीपयसीति। एतावत्पर्यन्तमेव नाटकं लिखितं भासेन।

अस्य नाटकस्याङ्गीरसः श्रृङ्गारः। करुणः, हास्यः भयानकश्चाङ्गरसाः वर्तन्ते।

ऐदंप्राथम्येन संस्थानेनायं प्रोजक्ट् पद्धतिः विविधपरिसरेषु आयोज्यते। तत्र गुरुवायूर्परिसरस्य कृते साहित्ये नारायणीयं भासनाटकचक्रञ्च दत्तमस्ति। एतच्च राष्ट्रियसंस्कृतसंस्यानस्य मानितविश्वविद्यालयस्य कुलपतीनां आचार्याणां राधावल्लभत्रिपाठिमहोदयानामसीमानुग्रहेण प्राप्तमिति तेभ्यः मुख्यसंपादकेभ्यः कृतज्ञताप्रसूनमालास्समर्प्यन्ते। एतस्य भासनाटकचक्रस्य सम्पादकाः आचार्याः परिसरप्राचार्याः प्रोफसर् के. टि.माधवन्महाभागा इति तेभ्योऽपि धन्यवादसुमनोमाल्यानि वितीर्यन्ते। एतस्याशुद्धिनिरीक्षणं विभागीयाः डा. पि. इन्दिरा, डा. सि. एस्. शान्ता, डा. पी. वि. श्रीदेवी, श्री. ए. एम्. सि. त्रिविक्रमन् नम्बूतिरि श्चाकुर्वन्, टङ्कणं डाटा एन्ड्रि ओप्परेटर श्रीमती जोर्लिन्जोषी अकरोदिति सर्वेभ्यः हार्दं कार्तज्ञं विनिवेदयामि ।।

इत्थं सहृदयविधेयः,

डा. राजन् इ. यम्.,

साहित्यविभागाध्यक्षः,

गुरुवायूर् परिसरः।

चारुदत्तम्

पुरुष-पात्राणि

नायकः	-	दरिद्रः सार्थवाहपुत्रः चारुद्त्तः।
विदूषकः (मैत्रेयः)	-	चारुदत्तस्य मित्रम्।
शकारः (संस्थानक)	-	राज्ञः श्यालकः प्रतिनायकः।
विटः	-	शकारस्य सहचरः।
संवाहकः	-	चारुदत्तस्य भूतपूर्वः भृत्यः
चेटः (वर्धमानकः)	-	
सूत्रधारः	-	रूपकस्य प्रधानः नटः

स्त्री-पात्राणि

गणिका	-	नायिका वसन्तसेना।
ब्राह्मणी	-	चारुदत्तस्य भार्या।
रदनिका	-	चारुदत्तस्य चेटी।
मदनिका	-	वसन्तसेनायाः दासी ।
विच्छित्तिका	-	वसन्तसेनायाः परिचारिका।
चतुरिका	-	" "
नटी	-	सूत्रधारस्य स्त्री।

चारुदत्तम्

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः- किण्णु खु अज्ज पच्चूस एव्व गेहादो णिक्खन्तस्स बुभुक्खाए पुक्खरपत्तपडिदजळविन्दू विअ चञ्चळाअन्ति विअ मे अक्खीणि। (परिक्रम्य) जाव गेहं गच्छिअ जाणामि किण्णु हु संविधा विहिदा ण वेत्ति। (परिक्रम्य) एदं अम्हाणं गेहं। जाव पविसामि। (प्रविश्यावलोक्य) जह ळोहीपरिवट्टणकाळसारा भूमी, णेउब्भामणसुगन्धो विअ गन्धो, सुणिमित्तं विअ परिब्भमन्तो वडिवस्सअजणो, किण्णु खु संविधा विहिदा। आदु बुभुक्खाए ओदणमअं विअ जीवळोअं पेक्खामि। जाव अय्यं सद्दावेमि। अय्ये! इदो दाव। (किन्नु खल्वद्य प्रत्यूष एव गेहान्निष्क्रान्तस्य बुभुक्षया पुष्करपत्रपतितजलबिन्दू इव चञ्चलायेते इव मेऽक्षिणी। यावद् गेहं गत्वा जानामि किन्नु खलु संविधा विहिता न वेति। एतदस्माकं गेहम्। यावत् प्रविशामि। यथा लौहीपरिवर्तनकालसारा भूमिः, स्नेहोद्भावनसुगन्ध इव गन्धः, सुनिमित्तमिव परिभ्रमन् वरिवस्यकजनः, किन्नुखलु संविधा विहिता। अथवा बुभुक्षयौदनमयमिव जीवलोकं पश्यामि। यावदार्यां शब्दापयामि। आर्ये! इतस्तावत् ।)

नटी- अय्य! इअम्हि। अय्य! दिट्ठिआ खु सि आअदो। (आर्य! इयमस्मि। आर्य! दिष्टया खल्वस्यागतः।)

सूत्रधारः- अय्ये! किं अत्थि अम्हाणं गेहे को वि पादरासो। (आर्ये! किमस्त्यस्माकं गेहे कोऽपि प्रातराशः।

नटी- अत्थि। (अस्ति।)

सूत्रधारः- चिरं जीव। एवं सोभणाणि भोअणाणि दत्तिआ होहि। (चिरं जीव। एवं शोभनानि भोजनानि दात्री भव।)

नटी- अय्य! तुवं एव पडिवाळन्ती चिट्ठामि। (आर्य! त्वामेव प्रतिवाळन्ती चिट्ठामि। (आर्य! त्वामेव प्रतिपालयन्ती तिष्ठामि।)

सूत्रधारः- अय्ये! किं अत्थि अब्भत्थिदं। (आर्ये! किमस्त्यभ्यर्थितम्।)

नटी- अत्थि। (अस्ति।)

सूत्रधारः- एवं देवा तुमं अस्सासअन्तु। अय्ये! किं किं। एवं देवास्त्वामाश्चासयन्तु। आर्ये! किं किम्।)

नटी- धिदं गुळं दहिं तण्डुला अ अत्थि। (घृतं गुडो दधि तण्डुलाश्चास्ति।)

सूत्रधारः- एवं सव्वं अम्हाणं गेहे अत्थि। (एतत् सर्वमस्माकं गेहेऽस्ति।)

नटी- णहि णहि। अन्तळावणे। (नहि नहि। अन्तरापणे।)

सूत्रधारः- (सरोषम्) आः अणय्ये! एवं दे आसा छिन्दीअदु। अभावं च गमिस्ससि। अहं चण्डप्पवादळण्डुओ विअ वरण्डी पव्वदादो दूरं आरोविअ पाडिदो म्हि। (आः अनार्ये! एवं ते आशा छिद्यताम्। अभावं च गमिष्यसि। अहं चण्डाप्रवातलण्डित इव वरण्डः पर्वताद् दूरमारोप्य पातितोऽस्मि।

नटी- मा भाआहि मा भाआहि। मुहुत्तअं पडिवाळेदु अय्यो। सव्वं सज्जं भविस्सदि। ळद्धं णाम एदं। अज्ज मम उववासस्स अय्यो सहायो होदु। (मा बिभीहि मा बिभीहि। मुहूर्तकं प्रतिपालयत्वार्यः। सर्वं सज्जं भविष्यति। लब्धं नामैतत्। अद्य ममोपवासस्यार्यः सहायो भवतु।)

सूत्रधार ः- किण्णमहेओ अय्याए उववासो। (किन्नामधेय आर्याया उपवासः।)

नटी- अभिरूववदी णाम। (अभिरूपपतिर्नाम।)

सूत्रधारः- किं अण्णजादीए। (किमन्यजात्याम्।)

नटी- आम। (आम।)

सूत्रधारः- सव्वं दाव चिट्ठदु। को णु दाणि अय्याए उववासस्स उवदेसिओ। (सर्वे तावत् तिष्ठतु। को न्विदानीमार्याया उपवासस्योपदेशिकः।)

नटीः- इमिणा वडिवस्सएण चुण्णगोट्ठेण! (अनेन वरिवस्यकेन चूर्णगोष्ठेन!)

सूत्रधारः- साहु चुण्णगोट्ठ! साहु। (साधु चूर्णगोष्ठ! साधु ।)

नटी- जइ अय्यस्स अणुग्गहो, तदो इच्छेअं अम्हारिसजणजोग्गं कञ्चि बम्हणं णिमन्तेदुं। (यद्यार्यस्यानुग्रहः, तत इच्छेयमस्मादृशजनयोग्यं कञ्चिद् ब्राह्मणं निमन्त्रयितुम्।)

सूत्रधारः- धम्मिट्ठो खु णिओओ। तेण पादरासो वि मे भविस्सदि। जइ एव्वं, पविसदु अय्या। अहं वि अम्हारिसजणजोग्गं कञ्चि बम्हणं अण्णेसामि। (धर्मिष्ठः खलु नियोगः। तेन प्रातराशोऽपि मे भविष्यति। यद्येवं प्रविशत्वार्या। अहमप्यस्मादृशजनयोग्यं कञ्चिद् ब्राह्मणमन्विष्यामि।)

नटी- जं अय्यो आणवेदि। (निष्क्रान्तः) (यदार्य आज्ञापयति।)

सूत्रधारः- कहि ण्णु खु दरिद्दबम्हणं ळभेअं। (विलोक्य) एसो अय्य चारुदत्तस्स वअस्सो अय्यमेत्तेओ णाम बम्हणो इदो एव्व आगच्छदि। जाव उवणिमन्तेमि। (परिक्रम्य) अय्य! णिमन्तिदो सि। आमन्तणस्स मा दरिद्द त्ति मं अवमण्णेहि। सम्पण्णं अण्हिदव्वं भविस्सदि। धिदं गुळं दहिं तण्डुला अ सव्वं अत्थि। अवि अ दक्खिणामासआणि भविस्सन्ति। (कुत्र नु खलु दरिद्रब्राह्मणं लभेय। एष आर्यचारुदत्तस्य वयस्य आर्यमैत्रेयो नाम ब्राह्मण इत एवागच्छति। यावदुपनिमन्त्रयामि। आर्य! निमन्त्रितोऽसि आमन्त्रणस्य मा दरिद्र इति मामवमन्यस्व। सम्पन्नमशितव्यं भविष्यति। घृतं गुडो दधि तण्डुलाश्च सर्वमस्ति। अपि च दक्षिणामषका भविष्यन्ति।)

(नेपथ्ये)

अण्णं अण्णं णिमन्तेदु दाव भवं। अरित्तओ दाव अहं। (अन्यमन्यं निमन्त्रयतु तावद् भवान्। अरिक्तकस्तावदहम्।)

सूत्रधारः-
घिदगुळदहिसुसमिद्धं धूविअसूवोवदं ससम्भि ण्णं।
सक्कारदत्तमिट्ठं भूञ्जीअदु भत्तमय्येण ।। १ ।।
(घृतगुडदधिसुसमृद्धं धूपितसूपोपदंशसम्भिन्नम् ।
सत्कारदत्तमिष्टं भुज्यतां भक्तमार्येण ।। १ ।।

(निष्क्रान्तः।)

(ततः प्रविशति विदूषकः।)

विदूषकः- अण्णं अण्णं णिमन्तेदु दाव भवं। अरित्तओ दाव अहं। णं भणामि अहं अरित्तओ त्ति। किं भणासि-सम्पण्णं असणं अण्हिदव्वं भविस्सदि त्ति। अहं पुण जाणामि। अहिअमहुरस्स अम्बस्स अजोग्गादाए अट्ठि ण भक्खीअदि त्ति। किं दाणि मं उळ्ळाळिअ उळ्ळाळिअ भणासि। भणामि वावुदो त्ति। किं भणासि-दक्खि-णामासआणि भविस्सदि त्ति। एसो वाआ पच्छाचक्खिदो हिअएण अणुबन्धी अमाणो गच्छीअदि। अहो अच्छाहिदं। अहं वि णाम परस्स आमन्तआणि त्ति तक्केमि। जो अहं तत्तहोदो चारुदत्तस्स गेहे अहोरत्तपय्यत्तसिद्धेहि णाणाविधेहि हिङ्गुविद्धेहि ओग्गारणसुगन्धेहि भूक्खेवमत्तपडिच्छिदेहि अन्तरन्तरपाणीएहि असणप्पआरेहि चित्तअरो विअ बहुमळ्ळएहि परिवुदो आअण्ठमत्तं अण्हिअचच्चरवुसहो विअ मोदअखज्जएहि परिवुदो आअण्ठमत्तं अणिहअ चच्चरवुसहो विअ मोदअखज्जएहि रोमन्थाअमाणो दिवसं खेवेमि, सो एव्व दाणि अहं तत्तहोदो चारुत्तस्स दरिद्ददाए समं पारावदेहि साहारणवुत्तिं उवजीवन्तो अण्णहिं चरिअ चरिअ तस्स आवासं एव्व गच्छामि। अण्णं च अच्छरिअं । मम उदरं अवत्था विसेसं जाणादि। अप्पेणावि तुस्सदि। बहुअं वि ओदणभरं भरिस्सदि दीअमाणं। ण आएदि अदीअमाणं, ण पच्चाचिक्खदि। ण खु अहं एरिसेण ण सन्तुट्ठो। ता सट्ठीकिददेवकय्यस्स तत्तहोदो चारुदत्तस्स कारणादो गहीदो सुमणी अन्तळिक्खवासो अ। जाव से पस्सपरिवत्ती होमि। (परिक्रम्यावलोक्य) एसो तत्त भवं चारुदत्तो पभादचन्दो विअ सकरुणाप्पिअदंसणो जहाविभवेणं गिहदेवदाणि अच्चअन्तो इदो एव्व आअच्छदि। जाव णं उवसप्पामि।

(निष्क्रान्तः।)

(अन्यमन्यं निमन्त्रयतु तावद् भवान्। अरिक्तकस्तावदहम्। ननु भणाम्यहमरिक्तक इति। किं भणसि-सम्पन्नमशनमशितव्यं भविष्यतीति। अहं पुनर्जानामि। अधिकमधुरस्य आम्रस्य अयोग्यतया अस्थि न भक्ष्यत इति। किमिदानीं मामुल्लाल्योल्लाल्य

भणसि। भणामि व्यापृत इति। किं भणसि- दक्षिणामाषका भविष्यन्तीति। एष वाचा प्रत्यख्यातो हृदयेनानुबध्यमानो गम्यते। अहो अत्याहितम्। अहमपि नाम परस्यामन्त्रणानीति तर्कयामि। योऽहं तत्रभवतश्चारुदत्तस्य गेहेंऽहोरात्रपर्याप्तसिद्धैर्नानाविधैर्हिङ्गुविद्धैरुदारसुगन्धिभिः भ्रुक्षेपमात्रप्रतीष्टैरन्तरान्तरपानीयै रशनप्रकारैश्चित्रकर इव बहुमल्लकैः परिवृत आकण्ठमात्रमशित्वा चत्वरवृषभ इव मोदकखाद्यै रोमन्थायमानो दिवसं क्षिपामि, स एवेदानीमहं तत्रभवतश्चारुदत्तस्य दरिद्रतया समं पारावतैः साधारणवृत्तिमुपजीवन् अन्यत्र चरित्वा चरित्वा तस्यावासमेव गच्छामि। अन्यच्चाश्चर्यम्। ममोदरमवस्थाविशेषं जानाति। अल्पेनापि तुष्यति। बहुकमप्योदनभरं भरिष्यति दीयमानम्। न याचते अदीयमानं, न प्रत्यचष्टे। न खल्वहमीदृशेन न सन्तुष्टः। तत् षष्ठी कृतदेवकार्यस्य तत्रभवतश्चारुदत्तस्य कारणाद् गृहीतानि सुमनसोऽन्तरीयवासश्च। यावदस्य पार्श्चपरिवर्ती भवामि। एष तत्रभवांश्चारुदत्तः प्रभातचन्द्र इव सकरुणप्रियदर्शनो यथाविभवेन गृहदैवतान्यर्चयन् इत एवागच्छति। यावदेनमुपसर्पामि।)

(ततः प्रविशति बलिमुपहरन्नायको विदूषकश्चाङ्गोरिकाहस्ता चेटी च।)

नायकः- (दीर्घ निःश्चस्य) भोः! दारिद्यं खलु नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्। कुतः,

यासां बलिर्भवति मद्गृहदेवहलीनां
हंसैश्च सारसगणैश्च विभक्तपुष्पः।
तास्तवेव पूर्वबलिरूढयवाङ्करासु
बीजाञ्जलिः पतति कीटमुखावलीढः ।। २ ।।

विदूषकः- अळं दाणि भवं अदिमत्तं सन्तप्पिदुं। पुरुसजोव्वणाणि विअ गिहजोव्वणाणि खु दसाविसेसं अणुहोन्ति। आसमुद्दआणविपण्णविभवस्स बहुळपक्खचन्दस्स जोण्हापरिक्खओ विअ भवदो एव्व रमणीओ अअं परिद्दभावो। (अलमिदानीं भवानतिमात्रं सन्तप्तुम्। पुरुषयौवनानीव गृहयौवनानि खलु दशाविशेषमनुभवन्ति। आसमुद्रयानविपन्नविभवस्य बहुलपक्षचन्द्रस्य ज्योत्स्नापरिक्षय इव भवत एव रमणीयोऽयं दरिद्रभावः।)

नायकः- न खल्वहं नष्टां श्रियमनुशोचामि। गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति। कुतः,

सुखं हि दुःखान्यनुभूय शोभते
यथान्धकारादिव दीपदर्शनम्।
सुखात्तु यो याति दशां दरिद्रतां
स्थितः शरीरेण मृतः स जीवति ।। ३ ।।

विदूषकः- भो वअस्स! समुद्दपट्टणसारभूदो तादिसो अत्थसञ्चओ कहिं गओ। (भो वयस्य! समुद्रपत्तनसारभूतस्तादृशोऽर्थसञ्चयः क्व गतः।)

नायकः- (निःश्वस्य) वयस्य! यत्र गतानि मे भागधेवानि। पश्य,

क्षीणा ममार्थाः प्रणयिक्रियासु
विमानितं नैव परं स्मरामि।
एतत्तु मे प्रत्ययदत्तमूल्यं
सत्त्वं सखे! न क्षयमभ्युपैति ।। ४ ।।

विदूषकः- किं भवं अत्थविभवं चिन्तेदि। (किं भवानर्थविभवं चिन्तयति।)

नायकः- सत्यं न मे धनविनाशगता विचिन्ता
भाग्यक्रमेण हि धनानि पुनर्भवन्ति।
एतत्तु मां दहति नष्टधनश्रियो मे
यत् सौहदानि सुजने शिथिलीभवन्ति ।। ५ ।।

अपि च, दारिद्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठत

सत्त्वं हास्यमुपैति शीलशशिनः कान्तिः परिम्लायते।
निर्वैरा विमुखीभवन्ति सुहृदः स्फीता भवन्त्यापदः
पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते ।। ६ ।।

विदूषकः- एदे दाणि दासीएपुत्ता अत्थवावारा गोवदारआ विअ मसअभीदा गिहादो णिग्गच्छन्ति। धणविणसदुक्खस्स उण चिन्तिअमाणस्स वसन्ते बुद्ढस्स सरत्थम्बस्स विअ अङ्कुरङ्कुरा उब्भमन्ति। ता अळं भवदो सन्दावेण। (एत इदानीं दास्याः पुत्रा अर्थव्यापारा गोपदारका इव मशकभीता गृहाद् निर्गच्छन्ति। धनविनाशदुःखस्य पुनश्चिन्त्यमानस्य वसन्ते वृद्धस्य शरस्तम्बस्येवाऽङ्कुराङ्कुरा उद्भ्रमन्ति। तदलं भवतः सन्तापेन।)

नायकः- वयस्य! किमर्थं सन्तापं करिष्ये। किञ्चाहं दरिद्रः, यस्य मम,

विभवानुवशा भार्या समदुःखसुखो भवान् ।
सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम् ।। ७ ।।

(ततः प्रविशति गणिका सम्भ्रान्ता विटेन शकारेण चानुगम्यमाना।)

शकारः- चिट्ठ चिट्ठ वशञ्चशेणिए! चिट्ठ,

किं याशि धावशि पधावशि पक्खळन्ती
शाहु प्पशीद ण मळीअशि चिट्ठ दाव।
कामेण शम्पदि हि डज्झइ मे शळीळं
अङ्गळम्झपडिदे विअ चम्मखण्डे ।। ८ ।।

(तिष्ठ तिष्ठ वसन्तसेने! तिष्ठ,)

किं यासि धावसि प्रधावसि प्रस्खलन्ती
साधु प्रसीद न मार्यसे तिष्ठ तावत्।
कामेन सम्प्रति हि दह्यते मे शरीर-
मङ्गारमध्यपतितमिव चर्मखण्डम् ।। ९ ।।

विटः- वसन्तसेने!

किं त्वं भयेन परिवर्तितसौकुमार्या
नृत्तोपदेशविशदौ चरणौ क्षिपन्ती।
उद्विग्नचञ्चलकटाक्षनिविष्टदृष्टि-
र्व्याघ्रानुसारचकिता हरिणीव यासि ।। ९ ।।

शकारः- भावे! एशा गच्छइ वशञ्चशेणिआ,

दुवेहि अम्हेहि अणुबन्धअन्ती जहा शिगाळी विअ कुक्कुळेहि।
शणूपुळा मेहळणादहाशा शवेट्टमं मे हळअं हळन्ती ।। १० ।।

(भाव! एषा गच्छति वसन्तसेना,

द्वाभ्यामावाभ्यामनुबध्यमाना यथा शृगालीव कुक्कुराभ्याम् ।
सनूपुरा मेखलानादहासा सवेष्टनं मे हृदयं हरन्ती ।। १० ।।

विटः- वसन्तसेने!

किं त्वं पदात् पदशतानि निवेशयन्ती
नागीव यासि पतगेन्द्रभयाभिभूता।
वेगादहं प्रचलितः पवनोपमेयः
किं त्वां ग्रहीतुमथवा न हि मेऽस्ति शक्तिः ।। ११ ।।

गणिका- (समन्तादवलोक्य) पळ्ळवअ! पळ्ळवअ! परहुदिए! परहुदिए! महुअरअ! महुअरअ! सारिए! हद्ध, णट्ठो मे परिजणो। एत्थं सअं एअ एअ अप्पा रक्खिदव्वो। (पल्लवक! पल्लवक! परभृतिके! परभृतिके! मधुकरक! मधुकरक! शारिके! शारिके!। हा धिक् नष्टो मे परिजनः । अत्र स्वयमेवात्मा रक्षितव्यः।)

शकारः- विळव विळव णाए! विळव पळ्ळवं वा, परहुदिअं वा, महुअरं वा, शाळिअं वा, शव्वं वशञ्चमाशं वा। के के तुमं परित्तअशि।

किं वाशुदेवे शवपट्टणेशे
कुन्तीशुदे वा जणमेजए वा।
अहं तुमं गणिहअ केशहत्थे
दुःशाशणे शीदमिवाहळामि ।। १२ ।।

(विलप विलप ज्ञाते! विलप पल्लवं वा, परभृतिकां वा, मधुकरं वा, शारिका वा, सर्वं वसन्तमासं वा। कः कस्त्वां परित्रास्यते।)

किं वासुदेवः शवपत्तनेशः
कुन्तीसुतो वा जनमेजयो वा।
अहं त्वा गृहीत्वा केशहस्ते
दुःशासनः सीतामिवाहरामि ।। १२ ।।

विटः- वसन्तसेने! सर्वत्र भयानभिज्ञहृदयं मां कुरु। पश्य,

परिचिततिमिरा मे शीलदोषेण रात्रि-
र्बहुलतिमिरकालास्तीर्णपूर्वा विघट्टाः ।
युवतिजनसमक्षं काममेतन्न वाच्यं
विपणिषु हतशेषा रक्षिणः साक्षिणो मे ।। १३ ।।

गणिका- हं इदाणिं संसइदा संवुत्ता, जो अप्पगुणाणि सअं एव्वं मन्तेदि। कहं एदे अकय्यं ण करिस्सन्दि। (अहमिदानीं संशयिता संवृत्ता, य आत्मगुणान् सअं एव्व मन्तेदि। कहं एदे अकय्यं ण करिस्सन्दि । (अहमिदानीं संशयिता संवृत्ता, य आत्मगुणान् स्वयमेव मन्त्रयते। कथमेतेऽकार्यं न करिष्यन्ति।)

विटः- भवति! क्रियतामस्माक्मानुनयप्रग्रहः। पश्य,

जनंयति खलु रोषं प्रश्रयो भिद्यमानः
किमिव च रुषितानां दुष्करं मद्विधानाम् ।
अनुनयति समर्थः खड्गदीर्घः करोऽयं
युवतिवधघृणाया मां शरीरं च रक्ष ।। १४ ।।

गणिकाः- अणुणओ वि खु से भाएदि। (अनुनयोऽपि खल्वस्य भाययति।)

शकारः- वशञ्चशेणिए! शुट्ठु भावे भणादि। बहुमणिणअदि खु दाव भळिअजणदुळ्ळहे अणुणए। पेक्ख वाशु!

अशि क्खु तिक्खे शिहिगीवमेअए
खिवेमि शीशं तव माळए हवा।

अळं तु अम्हाळिशकाणि ळोशिअ
मडे खु जो होइ ण णाम जीवइ ।। १५ ।।

(वसन्तसेने! सुष्ठु भावो भणति। बहुमानयते खलु तावद् बलवज्जन दुर्लभोऽनुनयः। पश्य वासु!)

असिः खलु तीक्ष्णः शिखिग्रीवामेचकः
क्षिपामि शीर्षं तव मारयेऽथवा।
अलं त्वस्मादृशकान् रोषयित्वा
मृतः खलु यो भवति न नाम जीवति ।। १५ ।।

गणिका- अय्य! कुळउत्तजणस्स सीळपरितोसोवजीविणी गणिआ खु अहं। (आर्य! कुलपुत्रजनस्य शीलपरितोषोपजीविनी गणिका खल्वहम्।)

विटः- अतः खलु प्रार्थ्यसे।

गणिका- अय्य! इमादो जणादो किं इच्छीअदि सरीरं वा आदु अळङ्कारो वा। (आर्य! अस्माज्जनात् किमिष्यते शरीरं वाथवालङ्कारो वा।)

विटः- न पुष्पमोक्षणमर्हति लता। कृतमलङ्कारेण।

गणिका- अहं खु दाणि अत्ताणं ण सन्दावेअं। (अहं खल्विदानीमात्मानं न सन्तापयेयम्।)

शकारः- वशञ्चशेणिए! अहं भट्टिपुत्ते कोमइदव्वे। (वसन्तसेने अहं भर्तृपुत्रः कामयितव्यः)

गणिकाः- सन्तो सि। (शान्तोऽसि।)

शकारः- शुणाहि भावे! शुणाहि। एशा वशञ्चशेणिआ मं शन्तो शि त्ति भणादि। (श्रृणु भाव! श्रृणु। एषा वसन्तसेना मां श्रान्तोऽसीति भणति!)

विटः- (आत्मगतम्) आक्रुष्टमात्मानं न जानाति मूर्खः। ध्वंस इत्युक्ते श्रान्त इत्यवगच्छति। अपि च,

अभिनयति वचांसि सर्वगात्रैः
किमपि किमप्यनवेक्षितार्थमाह।
अनुचितगतिरप्रगल्भवाक्यः
पुरुषमयस्य पशोर्नवावतारः ।। १६ ।।

(प्रकाशम्) वसन्तसेने! किमिदं मत्सन्निधौ वेशवासविरुद्धमथिहितम् । पश्य,

तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव।
वहसि हि धनहार्यं पण्यभूतं शरीरं
सममुपचर भद्रे! सुप्रियं चाप्रियं च ।। १७ ।।

गणिकाः- एसो मे अभिणिवेसो अभिजणेण तुळीअदि। (एष मेऽभिनिवेशोऽभिजनेन तोल्यते ।)

शकारः- भावे! एशा अन्धआळपूळिदगम्भीळाळच्छा दीशइ। मा खु णाए एत्थ भंशइदव्वा। आ कामदेवाणुआणप्पहुदि णअवमत्तशत्थुळं दळिद्दशत्थवाहपुत्तं चाळुदत्तवडुअं कामेदि एशा। इदं तश्श गेहश्श पक्खदुवाळं। (भाव! एषान्धकारपूरितगम्भीरारथ्या दृश्यते। माखलु ज्ञाता अत्रं भ्रंशयितव्या। आ कामदेवानुयानात् प्रभृति नयनमात्रसंस्थुलं दरिद्रसार्थवाहपुत्रं चारुदत्तवटुकं कामयत एषा । इदं तस्य गृहस्य पक्षद्वारम्।)

गणिका- (सहर्षमात्मगतम्) एदं तस्स गेहं। दिट्ठिआ दाणिं अमित्तजणणिरोहेण पिअजणसमीवं उवणीदम्हि। भोदु, एवं दाव करिस्सं। (उपसरति।) (एतत् तस्य गेहम्। दिष्ट्येदानीममित्रजननिरोधेन प्रियजनसमीपमुपनीतास्मि। भवतु, एवं तावत् करिष्यामि।

शकारः- (विलोक्य) भावे! णट्ठा णाए णट्ठा। (भाव! नष्टा ज्ञाता नष्टा।)

विटः- कथं नष्टा। अन्विष्यतामन्विष्यताम्।

शकारः- भावे! ण दिश्शदि। (भाव ! दृश्यते।)

विटः- हन्त वञ्चिताः स्मः। वसन्तसेने! उपलब्धेदानीमसि।

कामं प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामनीव जलदोदरसन्निरुद्धा
त्वां सूचयिष्यति हि वायुवशोपनीतो
गन्धश्च शब्दमुखराणि च भूषणानि ।। १८ ।।

(गणिका मालामपनीय भूषणानि चोत्सारयति।)

विटः- अहो बलवांश्चायमन्धकारः। सम्प्रति हि,

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता ।। १९ ।।

अपि च,

सुलभशरणमाश्रयो भयानां वनगहनं तिमिरं च तुल्यमेव।
उभयमपि हि रक्षतेऽन्धकारो जनयति यश्च भयानि यश्च भीतः ।। २० ।।

तथाहि-

आलोकविशाला मे सहसा तिमिरप्रवेशसञ्छन्ना।
उन्मीलितापि दृष्टिर्निमीलितेवान्धकारेण ।। २१ ।।

गणिकाः- अम्महे भित्तिपरिणामसूइदं पक्खदुवाळं। असम्भोअमळिणदाए इह अहिअं अन्धआरो। ता इह एव्व चिट्ठिस्सं। (स्थिता।) (अहोभित्तिपरिणामसूचितं पक्षद्वारम्। असम्भोगमलिनतयेहाधिक मन्धकारः। तद् इहैव स्थास्यामि।)

नायकः- मैत्रेय! गच्छ, चतुष्पथे बलिमुपहर मातृभ्यः।

विदूषकः- ण मे सद्धा, अण्णो गच्छदु। (न मे श्रद्धा, अन्यो गच्छतु।)

नायकः- किमर्थम्।

विदूषकः- मम बुद्धि आदंसमण्डळगआ विअ छाआ वामेसु दक्खिणा दक्खिणेसु वामा होइ। (मम बुद्धिरादर्शमण्डलगतेवच्छाया वामेषु दक्षिणा दक्षिणेषु वामा भवति।)

नायकः- मूर्ख! यथाविभवेनार्च्यताम्। भक्त्या तुष्यन्ति दैवतानि। तद् गम्यताम्।

विदूषकः- एआई अहं कहं गमिस्सं। (एकाक्यहं कथं गमिष्यामि।)

नायकः- रदनिके। अनुगच्छात्रभवन्तम्।

रदनिका- जं भट्टा आणवेदि। (यद् भर्ताज्ञापयति।)

विदूषकः- भोदि! दीवं अहं णइस्सं। (भवति! दीपमहं नेष्यामि।)

नायकः- यथा भवान् मन्यते तथास्तु।

विदूषकः- (दीपं गृहीत्वा) भो रदणिए! अवावुद पक्खदुवाळं। (भो रदनिके! अपावृणु पश्क्षद्वारम्।)

रदनिका- तह। (नाट्येन द्वारमपावृणोति) (तथा।)

(गणिका वस्त्रान्तेन दीपं निर्वापयति।)

विदूषकः- अविहा! अविहा!ऊ (अविहा! अविहा!।)

नायकः- वयस्य! किमेतत्।

विदूषकः- अवावुदपक्खदुवारपिण्डीकीदप्पविट्ठेण राअमग्गसङ्किण्णेण वादेण सहसा णिग्गच्छन्तस्स मम हत्थे णिवावुदो दीवो। (अपावृतपक्षद्वारपिण्डीकृतप्रविष्टेन राजमार्गसङ्कीर्णेन वातेन सहसा निर्गच्छतो मम हस्ते निर्वापितो दीपः।)

नायकः- मूर्ख! धिक् त्वाम्।

विदूषकः- अप्पं खु मे अवरद्धं। रदणिए! गच्छ, चउप्पहे मं पडिवाळेहि। जाव अहं वि अब्भन्तरचउस्साळादो दीव गणिहअ आअच्छामि। (निष्क्रान्तः।) (अल्पं खलु मेऽपराद्धम्। रदनिके! गच्छ, चतुष्पथे मां प्रतिपालय। यावदहमप्यभ्यन्तरचतुश्शालाद् दीपं गृहीत्वागच्छामि।)

चेटी- अय्य! तह। (परिक्रामति)। (आर्य! तथा।)

गणिका- "दिट्ठिआ मम पवेसणणिमित्तं अवावुदं पक्खदुवाळं। अळं चारित्तभएण। जाव पविसामि। (अभ्यन्तरं प्रविश्य तिष्ठति।) दिष्ट्या मम प्रवेशनिमित्तमपावृतं पक्षद्वारम्। अलं चारित्रभयेन। यावत् प्रविशामि।)

विटः- (विलोक्यात्मगतम्) भवनान्निर्गत्य काचिदियमागच्छति। भवतु अनया वराकं वञ्चयामि। (प्रकाशम्) सुरभिस्नानधूपानुविद्ध इव गन्धः।

शकारः- आम भावे! शुणामि गन्धिं शवणेहि। अन्धआळपुळिदेहिं णाशापुडेहिं शुट्ठु ण पेक्खामि। (आम भाव! श्रृणोमि गन्धं श्रवणाभ्याम्। अन्धकारपूरिताभ्यां नासापुटाभ्यां सुष्ठु न पश्यामि।)

विटः- तिष्ठ तिष्ठ। क्व यास्यमसि। चेटीं गृह्णाति।)

(चेटी सभयं भूमौ पतिता।)

शकारः- गण्ह भावे! गण्ह। (गृहाण भाव! गृहाण।)

विटः- एषा हि वयसो दर्पात् कुलपुत्रावमानिनी।
केशेषु कुसुमन्यासैः सेवितव्येषु धर्षिता ।। २२ ।।

शकारः- भावे! किं गहीदा। (भाव! किं गृहीता।)

विटः - अथ किम्। एषा गन्धानुसारेण गृहीता।

शाकारः- दाशीए पुत्तीए शीशं दाव छिन्दिअ पच्चा माळइश्शं। (दास्याः पुत्र्याः शीर्षं तावच्छित्वा पश्चान्मारयिष्यामि।)

विटः- गृह्यतां तावत्।

शकारः- (चेटीं गृहीत्वा)

एशा हि वाशू शिळशि ग्गहीदा केशेशु वाळेशु शिळोळुहेशु।
कूजाहि कन्दाहि ळवाहि वात्तं महेश्शळं शङ्कळभिश्शळं वा ।। २३ ।।
एषा हि वासूः शिरसि गृहीता केशेषु वालेषु शिरोरुहेषु।
कूज क्रन्द लाप वार्तं महेश्वरं शङ्करमीश्वरं वा ।। २३ ।।

चेटी- किं अय्यमिस्सेहि ववसिदं। (किमार्यमिश्रैर्व्यवसितम्।)

शकारः- भावे! जाणामि शळयोगेन ण होइ वशञ्चशेणिआ ।। (भाव! जानामि स्वरयोगेन न भवति वसन्तसेना।)

विटः- न मोक्तव्या। वसन्तसेनैवैषा।

एषा रङ्गप्रवेशेन कलानां चैव शिक्षया।
स्वरान्तरेण दक्षा हि व्याहर्तुं तन्न मुच्यताम् ।। २४ ।।

विदूषकः- (दीपं गृहीत्वा) राअमग्गसङ्किण्णेण सीअसुउमारेण वादेण पदे पदे विक्खोहिअणजणि अतरङ्गतेळ्ळपुण्णभाअणं दीवं कहं वि रक्खिअं गणिहअ आअदोम्हि। (राजमार्गसङ्कीर्णेन शीतसुकुमारेण वातेन पदे पदे विक्षोभ्यमाणजनिततरङ्गतैलपूर्णभाजनं दीपं कथमपि रक्षित्वा गृहीत्वागतोऽस्मि।)

चेटीः- (खकारं पादेन ताडयन्ती रुदित्वा) अय्य! मेतेअ ! अयं परिभवो आदु अवळेवो। (आर्य! मैत्रेय! अयं परिभवोऽथवावलेपः ।।)

विदूषकः- मा दाव, मा दाव । (सखड्गं विटं शकारं च दृष्ट्वा शङ्कितस्तिष्ठति। (मा तावद्, मा तावत्।)

विटः- अये आर्यचारुदत्तस्य वयस्यो मैत्रेयः खल्वयम्। नेयमपि वसन्तसेना। महाब्राह्मण! अन्यशङ्कया खल्विदमस्माभिरनुष्ठितं, न दर्पात् । पश्यतु भवान्,

अकामा ह्रियतेऽस्माभिङ्ग काचित् स्वाधीनयौवना।
सा भ्रष्टा शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ।। २५ ।।

शकारः- अविहा दळिद्दशत्थवाहपुत्तश्श चाळुदत्तवडुअश्श चेडी खु इअं, ण होह वशञ्चशेणिआ। शाहु, वशञ्चशेणिए! शाहु! अन्धआळं कळिअ अन्तळा वञ्चिदे भावे, अहके दाव वञ्चिदे कूडकावडशीळए। शौवहा दुक्खडे कडे। (अविहा दरिद्रसार्थवाहपुत्रस्य चारुदत्तबटुकस्य चेटी खल्वियं, न भवति वसन्तसेना। साधु वसन्तसेने ! साधु। अन्धकारं कृत्वान्तरा वञ्चितो भावः। अहं तावद् वञ्चितः कूटकपटशीले। सर्वथा दुष्करं कृतम्।)

विदूषकः- मा दाव। ण जुत्तमिदं। (मा तावत्। न युक्तमिदम्।)

विटः- भो महाब्राह्मण! अयमनुनयसर्वस्वमाञ्जलिः।

विदूषकः- भोदु, भोदु, अणवरद्धो भवं। अणुणीदो अहं एव्व एत्थ अवरद्धो। (भवतु, भवतु अनपराद्धो भवान्। अनुनीतोऽहमेवात्रापराद्धः।)

शकारः- भावे! दिढं खु भाआशि तं दळिदृशत्थवाहपुत्तं चाळुदत्तवडुअं। (भाव! दृढं खलु बिभेषि तं दरिद्रसार्थवाहपुत्रं चारुदत्तवटुकम् ।)

विटः- सत्यं भीतोऽस्मि।

शकारः- किश्श भावे! किश्श। (कस्माद् भाव! कस्मात्।)

विटः- तस्य गुणेभ्यः। पश्यतु भवान्,

स मद्विधानां प्रणयैः कृशीकृतो
न तस्य कश्चिद् विभवैरमण्डितः।
निदाघसंशुष्क इव ह्रदो महान्
नृणां तु तृष्णामपनीय शुष्यति ।। २६ ।।

महाब्राह्मण! अयमर्थः सार्थवाहपुत्रस्य न कथयितव्यः।

(निष्क्रान्तो विटः।)

शकारः- माळिश! वडुअ! मालिश! भणेहि तं दळिद्दशत्थवाहपुत्तं चालुदत्तवडुअं मम मअणेण-ळाअशाळे शण्ठाणे शवट्टेण शीशेण अणुवन्दिअ भणादि-णाडअइत्थिआ वशञ्चशेणिआ णाम गणिआदारिआ शुवण्णावण्णा दुवेहि अम्मेहि बळक्कारेण णीअमाणा महन्तेण शुवण्णाळङ्कारेण तव गेहं पविट्ठा। शा शुवे णिय्याअइदव्वा। मा दाव तव अ मम अ दाळुणो खोहो होदित्ति। वडुअ! माळिश! इदं च भाणिहि-मा दाशीएपुत्त! वारावदगळप्पविट्ठं विअ मूळकन्दं शीशकवाळं मडमडाइश्शं। मा खु कवाडशम्पुडप्पविट्ठं

विअ पक्ककवित्थं शीशं दे चुण्णचुण्णं मडमडाइश्शं त्ति। (मारिष! बटुक! मारिष! भण तं दरद्रसार्थवाहपुत्रं चारुदत्तबटुकं मम वचनेन-राजश्यालः संस्थानकः सपट्टेन शीर्षेणानुवन्द्य भणति-नाटकस्त्री वसन्तसेना नाम गणिकादारिका सुवर्णवर्णा द्वाभ्यामावाभ्यां बलात्कारेण नीयमाना महता सुवर्णालङ्कारेण तव गेहं प्रविष्टा। सा श्वो निर्यातयतितव्या। मा तावत् तव च मम च दारुणः क्षोभो भवतीति। बटुक! मारिष! इदं च भण-मा दास्याः पुत्र! पारावतगलप्रविष्टमिव मूलकन्दं शीर्षकपालं मडमडायिष्यामि। मा खलु कपाटसम्पुटप्रविष्टमिव पक्वकपित्थं शीर्षं ते चूर्णं चूर्णं मडमडायिष्यामि इति।)

विदूषकः- भो! तह। (शकारं दीपेनोद्वेजयति)। (भोः! तथा।)

शकारः- (सर्वतो विलोक्य) कहिं भावे। गदे भावे! अविहा भावे!। (क्व भावः। गतो भावः। अविहा भाव!।)

(निष्क्रान्तः शकरः।)

विदूषकः- किदं देवकय्यं त्ति तत्तहोदो णिवेदइस्सामो। भोदि! अवणीअदु दे हिअअमण्णू। अअं वुत्तन्तो अब्भन्तरं ण पेसिदव्वो। (कृतं देवकार्यमिति तत्रभवतो निवेदयिष्यावः। भवति! अपनीयतां ते हृदयमन्युः अयं वृत्तान्तोऽभ्यन्तरं न प्रेषयितव्यः।)

चेटी- अय्य! रदणिआ खु अहं। (आर्य! रदनिका खल्वहम्।)

विदूषकः- एहि गच्छामो । (एहि गच्छावः।)

नायकः- भद्रे! कृतं देवकार्यम्।

गणिका- (आत्मगतम्) परिजणत्ति मं सद्दावेदि। भोदु रक्खिदम्हि। (परिजन इति मां शब्दापयति। भवतु, रक्षितास्मि।)

नायकः- मारुताभिलाषी प्रदोषः। तद् गृह्यतां प्रावारकम्।

गणिका- (प्रावारकं गृहीत्वा सहर्षम्) अणुदासीणं जोव्वणं से पडवासगन्धो सूएदि। (अनुदासीनं यौवनमस्य पटवासगन्धः सूचयति।)

नायकः- रदनिके! प्रवेश्यतामभ्यन्तरचतुःशालम्।

गणिका- (आत्मगतम्) अभाइणीं अहं अब्भन्तरप्पवेसस्स। (अभागिन्यहमभ्यन्तरप्रवेशस्य।)

नायकाः- किमिदानीं न प्रविशसि।

गणिका- इदाणिं अहं कि भणिस्सं। (इदानीमहं किं भणिष्यामि।)

नायकः- रदनिके किं विलम्बसे।

(रदनिकाविदूषकावुपसृत्य)

चेटी- भट्टिदारअ! इह म्हि। (भर्तृदारक! इयमस्मि।)

नायकः- इयमिदानीं का।

अविज्ञातप्रयुक्तेन घर्षिता मम वाससा।
संवृता शरदभ्रेण चन्द्रलेखेव शोभते ।। २७ ।।

गणिका- (आत्मगतम्) दीवाळोअसूइदरूवो सो एव्व दाणि एसो, जस्स किदे अहं णिस्सासमत्तळक्खिदं सरीरं उव्वहामि। (दीपालोकसूचितरूपः स एवेदानीमेषः यस्य कृतेऽहं निःश्वासमात्ररक्षितं शरीरमुद्वहामि।)

विदूषकः- भो चारुदत्त! राअसाळो सण्ठाणो सवट्ठेण सीसेण अणुवन्दिअ विण्णवेदि-णाडअइत्थिआ वसन्तसेणिआ णाम गणिआदारिआ महनतेण सुवण्णाळङ्कारेणण तुम्हाणं गेहं पविट्ठा। सा सुवे णिय्याअदव्वत्ति। (भोः चारुदत्त! राजश्यालः संस्थानः सपट्टेन शीर्षेणा नुवन्द्य विज्ञापयति-नाटकस्त्री वसन्तसेना नाम गणिकादारिकास्माभिर्बलात्कारेण नीयमाना महता सुवर्णालङ्कारेण युष्माकं गेहं प्रविष्टा। सा श्वो निर्यातायितव्येति।)

गणिका- हं बळक्कारेण णीअमाणत्ति णं भणादि। भोदु, अअं पत्तकाळो। (प्रकाशम्) अय्य! सरणागदम्हि। (हं बलात्कारेण नीयमानेति ननु भणति। भवतु, अयं प्राप्तकालः। आर्य! शरणागतास्मि।)

नायकः- न भेतव्यम्। न भेतव्यम् । किं वसन्तसेनैषा।

विदूषकः- अविहा वसन्तसेणा। (अपवार्य) भो चारुदत्त! वसन्तसेणा खुइअं, जा भवदा कामदेवाणुअणप्पहुदि णअण मत्तसत्थुदा सण्णिहिदमणोभवेण हिअएण उव्वहीअदि। ता पेक्खदु इअं। (अविहा वसन्तसेना। भोः चारूदत्त! वसन्तसेना खल्वियं, या भवता गामदेवानुयानप्रभृति नयनमात्रसंस्तुता सन्निहितमनोभवेन हृदयेनोदुह्यते। तत् पश्यत्विमाम्।)

नायकः- वयस्य! पश्याम्येनां,

यत्र मे पतितः कामः क्षीणे विभवसञ्चये।
रोषः कुपुरुषस्येव स्वाङ्गेष्वेवावसीदति ।। २८ ।।

गणिका- अदिण्णभूमिप्पवेसपधरिसणेण अवरद्धा अहं अय्यं सीसेण पसादेमि। (अदत्तभूमिप्रवेशप्रघर्षणेनापराद्धाहमार्यं शीर्षेण प्रसादयामि।)

नायकः- यद्येवमहमपि तावदविज्ञातप्रयुक्तेन प्रेष्यसमुदाचारेण सापराधो भवतीं प्रसादयामि।

विदूषकः- भो! विवहन्ता इव सअडिअं दुव्विणीदबळीवद्दा अण्णोण्णं सङ्किळेसन्ति। अहं दाणि कं पसादेमि। भोदु, दाणिरदणिअं पसादेमि। रदणिए! पसीददु, पसीददु होदी। (भोः! विवहन्ताविव शकटिकां दुर्विनीतबलीवर्दावन्योन्यं क्लेशयतः। अहमिदानीं कं प्रसादयामि । भवतु, इदानीं रदनिकां प्रसादयामि। रदनिके! प्रसीदतु प्रसीदतु भवती।)

नायकः- भवति! परवानस्मि। किमनुतिष्ठति स्नेहः।

गणिका- (आत्मगतम्) महुरं खु इच्छिदव्वं। अदक्खिणं खु पढमदंसणे जइच्छागदाए इह वसिदुं। ता एवं करिस्सं। (प्रकाशम्) जइ मे अय्यो पसण्णो, अअं मे अळङ्कारो इह एव्व चिट्ठदु। अळङ्कारणिच्छामि। (मधुरं खल्वेष्टव्यम्। अदक्षिणं खलु प्रथमदर्शने अयं मेऽलङ्कार इहैव तिष्ठतु। अलङ्कार निमित्तं पापा मामनुसरन्ति। अहमप्यार्येण रक्षिता गेहं गन्दुमिच्छामि।)

नायकः- अन्वर्थमुपदिशति। मैत्रेय! गृह्यताम्।

विदूषकः- ण मे सद्धा। (न मे श्रद्धा।)

नायकः- मूर्ख! गृह्यताम्।

विदूषकः- जं भवं आणवेदि। आणेदु भोदी। (यद् भवानाज्ञापयति। आनयतु भवती।)

(गणिका विमुच्यालङ्कारं प्रयच्छति।)

विदूषकः- (गृहीत्वा) रदणिए! गण्ह एदं सुवण्णालङ्कारं तुवं। सट्ठीए सत्तमीए अ धारेहि। अहं अट्ठमीए अणद्धाए धारइस्सं। (रदनिके! गृहाणैतं सुवर्णालङ्कारं त्वम्। षष्ठयां सप्तम्यां च धारय। अहमष्टम्यामनध्याये धारयिष्यामि।)

चेटी- (विहस्य) सत्थं वक्खाणअन्तस्स भट्टिपुत्तस्स तदाणिं अवसरोहोदि। अणेदु अय्यो। (गृहीत्वा निष्क्रान्ता।) (शास्त्रं व्याचक्षाणस्य भर्तृपुत्रस्य तदानीमवसरो भवति। आनयत्वार्यः।)

नायकः- कोऽत्र भोः! दीपिका तावत्।

विदूषकः- भोः! दीविआ गणिका विअ णिस्सिणेहा संवुत्ता । (भोः! दीपिका गणिकेव निःस्नेहा संवृत्ता।)

नायकः- कृतं दीपिकया। (विलोक्य), उदितो भगवान् सर्वजनसामान्य प्रदीपश्चन्द्रः। अतः खलु,

उदयति हि शशाङ्कः क्लिन्नखर्जूरपाण्डु-
र्युवतिजनसहायो राजमार्गप्रदीपः।

तिमिरनिचयमध्ये रश्मयो यस्य गौरा
हतजल इव पङ्के क्षीरधाराः पतन्ति ।। २९ ।।

भवति! राजमार्गे निष्क्रमणः क्रियताम्। सखे! अनुगच्छात्रभवतीम्।

विदूषकः- जं भवं आणवेदि। एदु एदु भोदि। (यद् भवानाज्ञापयति। एत्वेतु भवती।)

(निष्क्रान्ताः सर्वे।)

प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः।

(ततः प्रविशति गणिका चेटी च।)

गणिका- तदो तदो। (ततस्ततः।)

चेटी- अम्महे ण किञ्चि मए भणिद्रं। किं तदो तदो त्ति। (अम्महे न किञ्चिन्मया भणितम्। किं ततस्तत इति।)

गणिका- हञ्जे! किं मए मन्तिदं। (हञ्जे! किं मया मन्त्रितम्।)

चेटी- अज्जुए! सिणेहो पुच्छदि, ण पुरोभाइदा। किं चिन्तीअदि। (अज्जुके! स्नेहः पृच्छति, न पुरोभागिता। किं चिन्त्यते।)

गणिका- हञ्जे! तुमं दाव किं त्ति तक्केसि । (हञ्जे! त्वं तावत् किमिति तर्कयसि।)

चेटी- अप्पओअणदाए घणिआभावस्स अज्जुआ कं पि कामेदि त्ति तक्केमि। (अप्रयोजनतया गणिकाभावस्याज्जुका कमपि कामयत इति तर्कयामि।)

गणिका- सुट्ठु तुए किदं। अवञ्चिदा दे दिट्ठी। ईदिसवण्णय्येव। (सुष्टुत्वया कृतम्। अवञ्चिता ते दृष्टिः। ईदृशवर्णेव।)

चेटी- अणळंकिदं पि अज्जुअं मण्डिदं विअ पेक्खामि। कामो हि भअवं अणवगीदो ऊसुवो तरुणजणस्स। (अनलङ्कृतामप्यज्जुकां मण्डितामिव पश्यामि। कामो हि भगवाननवगीत उत्सवस्तरुणजनस्य।)

गणिका- हदासे! उक्कण्ठिदव्वे का दे रदी। (हताशे! उत्कण्ठितव्ये का ते रतिः।)

चेटी- अज्जुए! इच्छामि पुच्छिदुं बहुमाणो विअ रमणीओ कोच्चि राअकुमारो। (अज्जुके! इच्छामि प्रष्टुं बहुमान इव रमणीयः कश्चिद् राजकुमारः।)

गणिका- रमिदुं इच्छामि, ण सेविदुं । (रन्तुमिच्छामि, न सेवितुम्।)

चेटी- किण्णु खु विज्जाविसेसरमणीओ कोच्चि बहम्हणदारओ। (किन्नु खलु विद्याविशेषरमणीयः कश्चित् ब्राह्मणदारकः।)

गणिका- अत्थि अदिबहुमहो विस्संभो। पूअणीओ खु सो जणो। (अस्त्यतिबहुमतो विस्रम्भः। पूजनीयः खलु स जनः।)

चेटी- किण्णु हु वणिजदारओ कोच्चि आगन्तुओ। (किन्नु खलु वणिग्दारकः कश्चिदागन्तुकः।)

गणिका- उम्मत्तिए! आसाच्छेदं उक्कण्ठन्ता का सहेदि। (उन्भत्तिके! आशाच्छेदमुतकण्ठमाना का सहते।)

चेटी- किं ण सक्कं सोदुं। को अम्हाणं मणोरहाउत्तो। (किं न शक्यं श्रोतुम । कोऽस्माकं मनोरथावुत्तः।)

गणिका- किं तुवं कामदेवाणुयाणे ण आअदा सि। (किं त्वं कामदेवानुयाने नागतासि।)

चेटी- णं आअदम्हि (नन्वागतास्सि।)

गणिका- केण उदासीणं मन्तेसि। (केनोदासीनं मन्त्रयसे।)

चेटी- भणादु, भणादु अज्जुआ, भणादु। (भणतु, भणात्वज्जुका, भणतु।)

गणिका- हञ्जे! सुणाहि दाव। अत्थि सत्थवाहपुत्तो चारुदत्तो णाम। (हञ्जे! श्रृणु तावत्। अस्ति सार्थवाहपुत्रश्चारुदत्तो नाम।)

चेटी- जेण सरणागदा तुवं रक्खिदा। (येन शरणागता त्वं रक्षिता।)

गणिका- सो एव्व। (स एव।)

चेटी- हद्धि, दरिद्दो क्खु सो। (हा धिक, दरिद्रः खलु सः।)

गणिका- अदो क्खु कामीअदि। अदिदरिद्दपुरुससत्ता गणिआ अवअणीआ होइ। (अतः खलु काम्यते। अतिदरिद्रपुरुषसक्ता गणिकाअवचनीया भवति।)

चेटी- अज्जुए! उद्धूदपुप्फं सहआरं महुअराओ उवासन्ति। (अज्जुके! उद्धूतपुष्पं सहकारं मधुकरा उपासते ।)

गणिका- हञ्जे! एवं, उवासन्ति। दे महुअरा त्ति पुच्छीअन्ति। (हढ्जे! एवम्, उपासते। ते मधुकरा इति पृच्छयन्ते।)

चेटी- किं, विहवमन्ददाए वेसवासण्पसङ्गकादरो दुक्खं ति जइ ण आअच्छे। (किं, विभवमन्दतया वेशवासप्रसङ्गकातरो दुःखमिति यदि नागच्छेत्।)

गणिका- णं अहं तं कामेमि। (नन्वहं तं कामये।)

चेटी- जइ एत्तओ बहुमाणो, किं णाभिसरीअदि। यद्येतावान् बहुमानः, किं नाभिस्त्रियते।)

गणिका- ण हु ण गच्छामि। किन्तु सहसा अभिसरिदो पच्चुअआरदुळ्ळभदाए पुणो मे दुळ्ळभो भवे त्ति विळम्बेमि। (न खलु न गच्छामि। किन्तु सहसाभिसृत> प्रत्युपकारदुर्लभतया पुनर्मे दुर्लभो भवेदिति विलम्बे।)

चेटी- हं, किं अतण्णिमित्तं तहिं एव्वं सो अळङ्कारो ठाविदो। (हं, किमेतन्निमित्तं तत्रैव सोऽलङ्कारःस्थापितः।)

गणिका- ईदिसं एव्व। (ईदृशमेव।)

(ततः प्रविशत्यपटीक्षेपेण संवाहकः।)

संवाहकः- अय्ये ! सरणागदो म्हि। (आर्ये! शरणागतोऽस्मि।)

गणिका- अळं अय्यस्स सम्भमेण। (अलमार्यस्य सम्भ्रमेण।)

चेटी- हं, को दाणि एसो। (हं क इदानीमेषः।)

गणिका- उन्मत्तिए! किं सरणाअदो पुच्छीअदि। (उन्मत्तिके! किं शरणागतः पृच्छ्यते।)

चेटी- अवि णाम साहसिओ भवे। (अपि नाम साहसिको भवेत्।)

गणिका- उन्मत्तिए! गुणवन्तो रक्खिदव्वो होदि। (उन्मत्तिके! गुणवान् रक्षितव्यो भवति।)

संवाहकः- अय्ये! णं भएण उवआरो विस्सरिदो, ण परिभवेण। पेक्खदु अय्या, भीदाहवा पधरिसिदाहवा आवण्णाहवा सुळभचारित्तवञ्चणाहवा अवराहेदुं समत्था होन्ति। (आर्ये! ननु भयेनोपचारो विस्मृतः, न परिभवेन। पश्यत्वार्या, भीता अथवा प्रर्घिता अथवा आपन्ना अथवा सुलभचारित्रवञ्चना वा अपराधयितुं समर्था भवन्ति।)

गणिका- भोदु, भोदु। विस्सत्थो भोदु अय्यो। गणिआ खु अहं। (भवतु, भवतु। विश्वस्तो भवत्वार्यः। गणिका खल्वहम्।)

संवाहकः- अभिजणेण, ण सीळेण। (अभिजनेन, न शीलेन।)

गणिका- हञ्जे! एवं विअ। (हञ्जे! एवमिव।)

चेटी- अज्जुआ अय्यं पुच्छदि, कुदो अय्यस्स भअं ति। (अज्जुकार्यं पृच्छति, कुत आर्यस्य भयमिति।)

संवाहकः- अय्ये! धणिआदो। (आर्ये! धनिकात्।)

गणिका- जइ एवं, आसणं देदु अय्यस्स। (यद्येवम्, आसनं दीयतामार्यस्य।)

चेटी- तह। (आसनं ददाति।)। (तथा।)

गणिका- उवविकदु अय्यो। (उपविशत्वार्यः।)

संवाहकः- (स्वगतम्) पूआविसेसेण जाणामि कय्यं ति। (उपविशति।) (पूजाविशेषेण जानामि कार्यमिति।)

गणिकाः- हञ्जे! एवं विअ। (हञ्जे! एवमिव।)

चेटी- अज्जुए! तह। अय्य! राअमग्गे विस्सत्थसम्पादं अय्यं कादुं इच्छदि अज्जुआ। कस्स किं कत्तव्वं। (अज्जुके! तथा। आर्य! राजमार्गे विश्वस्तसम्पातमार्यं कर्तुमिच्छत्यज्जुका। कस्य किं कर्तव्यम्।)

संवाहकः- सुणादु अय्या । (श्रृणोत्वार्या।)

गणिका- अवहिदम्हि। (अवहितास्मि।)

संवाहकः- पाडळिपुत्तं मे जम्मभूमी। पकिदीए वणिजओ अहं। तदो भाअधेअपरिवुत्तदाए दसाए संवाहअवुत्तिं उवजीवामि। (पाटलिपुत्रं मे जन्मभूमिः। प्रकृत्या वणिगहम्। ततो भागधेयपरिवृत्ततया दशया संवाहकवृत्तिमुपजीवामि।)

गणिका- संवाहओ अय्यो । सुउमारा कळा सिक्खिदा अय्येण। (संवाहक आर्यः। सुकुमारा कला शिक्षितार्येण।)

संवाहकः- कळेत्ति सिक्खिदा। आजीविअं दाणि संवुत्तम्। (कलेति शिक्षिता। आजीविकेदानीं संवृत्ता।)

गणिका- णिव्वेदसूअअं विअ वअणं अय्यस्स। तदो तदो। (निर्वेदसूचकमिव वचनमार्यस्य। ततस्ततः।)

संवाहकः- अज्जुए! सो दाणि अहं आअन्तुआणं सुणिअ पुरूसविसेसकोदूहळेण आअदो म्हि इमं उज्जअणं। (अज्जुके! स इदानीमहमागन्तुकानां श्रुत्वा पुरुषविशेषकौतूहलेनागतोऽस्मीमा-मुज्जयिनीम्।)

गणिका- तदो तदो। (ततस्ततः।)

संवाहकः- तदो इह आअदमत्त एव्व कोच्चि सत्थवाहपुत्तो समासादिदो। (तत इहागतमात्र एव कश्चित् सार्थवाहपुत्रः समासादितः।)

गणिका- केरिसो। (कीदृशः।)

संवाहकः- आइदिमन्तो अविब्भमन्तो अणुच्छित्तो ळळिदो ळळिददाए अविम्हओ चउरो महुरो दक्खो सदक्खिञ्ञो अभिमदो आइदो तुट्ठो होदि। दय्य ण विकत्थेदि। अप्पं वि सुमरदि, बहुअं पि अवइदं विसुमरदि। अज्जुए! किं बहुणा, तस्स कुळवुत्तस्स गुणाणं चउब्भाअं पि सुदिग्घेण वि गिम्हदिअहेण वण्णिदुं ण सक्कं कि बहुणा, दक्खिञ्ञदाए परकेरअं विअ अत्तणो सरीरं धारेदि। (आकृतिमान् अविभ्रमन् अनुत्सिक्तो ललितो ललिततयाविस्मयश्चतुरो मधुरो दक्षः सदाक्षिण्योऽभिमत आचितस्तुष्टो भवति। दत्त्वा न विकत्थते। अल्पमपि स्मरति, बहुकमप्यपकृतं विस्मरति। अज्जुके! किं बहुना तस्य कुलपुत्रस्य गुणानां चतुर्भागमपि सुदीर्घेणापि ग्रीष्मदिवसेन वर्णयितुं न शक्यम्। किं बहुना, दक्षिणतया परकीयमिवात्मनः शरीरं धारयति।)

गणिका- (अपवार्य) हञ्जे! को णु खु सो अय्यचारुदत्तस्स गुणाणं अणुकरेदि। (हञ्जे! को नु खलु स आर्यचारुदत्तस्य गुणानामनुकरोति।)

चेटी- मम वि कोदूहलं सोदुं। को णु हु उज्जअणिं अत्तणो गुणेहि मण्डेदि। (ममापि कौतूहलं श्रोतुम्। को नु खलूज्जयनीमात्मनो गुणैर्मण्डयति।)

गणिका- तदो तदो। (ततस्ततः।)

संवाहकः- तदो तस्स गुणविक्किणिदसरीरो विस्सरिदकळत्तो उवजीविओ संवुत्तो। (ततस्तस्य गुणविक्रीतशरीरो विस्मृतकलत्र उपजीवि संवृत्तः।)

गणिका- किं सो दरिद्दो। (किं स दरिद्रः।)

संवाहकः- कहं अणाचिक्खिदे अय्या जाणादि। (कथमनाख्यात आर्या जानाति।)

गणिका- एअस्सिं दुळ्ळहो गुणविभवो त्ति। तदो तदो। (एकस्मिन् दुर्लभो गुणविभव इति। ततस्ततः।)

चेटी- को णाम सो अय्यो। (को नाम स आर्यः।)

संवाहकः- अय्यचारुदत्तो णाम। (आर्यचारुदत्तो नाम।)

गणिका- जुज्जइ। तदो तदो। (युज्यते। ततस्ततः।)

संवाहकः- तदो सो विभवमन्ददाए अस्साहीणपरिजणो विसज्जि अकुडुम्बभरणो चारित्तमत्तावसेसो सत्थवाहकुळे पडिवसदि। अहं पि तेण अय्येण अब्भणुञ्ञादो-अण्णं उवचिट्ठदु त्ति। कहं अण्णं सरिसं मणुस्सरअणं ळभेअं ति, कहं च तस्स कोमळ्ळळिदमहुरसरीप्परिसकिदत्थं मे हत्थं साहारणसरीरसम्मद्देण सोअमीअं करिस्सं ति जादणिव्वेदो दद्धसरीररकक्खणत्थं जूदोवजीवि संवुत्तो। (ततः स विभवमन्दतयास्वाधीनपरिजनो विसर्जितकुटुम्बभरणश्चारित्रमात्रावशेषः सार्थवाहकुले प्रतिवसति। अहमपि तेनार्येणाभ्यनुज्ञातोऽन्यमुपतिष्ठतामिति। कथमन्यमीदृशं मनुष्यरत्नं लभेयेति, कथं च तस्य कोमलललितमधुरशरीरस्पर्शकृतार्थं मे हस्तं साधारणशरीरसंमर्दन शोचनीयं करिष्यामीति जातनिर्वेदो दग्धशरीररक्षणार्थं द्यूतोपजीवी संवृत्तः।

चेटी- तदो तदो (ततस्ततः।)

संवाहकः- तदो बहूणि दिणाणि मए पराइदेण पुरुसेण कदाइ अहं पि दहसु सुवण्णेसु पराइदो म्हि। (ततो बहूनि दिनानि मया पराजितेन पुरुषेण कदाचिदहमपि दशसु सुवर्णेषु पराजितोऽस्मि।)

गणिका- तदो तदो (ततस्ततः।)

संवाहकः- तदो अज्ज वेसमग्गे जइच्छोवणदो समासादिदो म्हि। तस्स भएण इह पविट्ठो। एवं अय्या जाणादु। (ततोऽद्य वेशमर्गे यदृच्छोपनतः समासादितोऽस्मि। तस्य भयेनेह प्रविष्टः। एवमार्या जानातु।)

गणिका- (आत्मगतम्) अहो अच्चाहिदं। एवं खु मण्णे वासपादपविणासेण पक्खिणो आहिण्डन्ति त्ति। (प्रकाशम्) एवं गदे अत्तकेरओ अय्यो। हळा! एहि तं जणं विसज्जेहि। (अहो अत्याहितम्। एवं खलु मन्ये वासपादपविनाशेन पक्षिण आहिण्डन्त इति। एवं गत आत्मीय आर्यः। हला! एहि तं जनं विसर्जय।)

चेटी- तह। (निष्क्रान्ता।) (तथा।)

गणिका- ण खु अय्येण अत्थणिमित्ता चिन्ता कादव्वा। अय्यचारुदत्तो एव्व देदि त्ति अय्यो जाणादु। (न खल्वार्येणार्थनिमित्ता चिन्ता कर्तव्या। आर्यचारुदत्त एव ददातीत्यार्यो जानातु।)

(प्रविश्य)

चेटी- अज्जुए! विसज्जिदो सो जणो, परितुट्ठो गदो अ। (अज्जुके! विसर्जितः स जनः, परितुष्टो गतश्च)

संवाहकः- अणुग्गहिदो म्हि। (अनुगृहीतोऽस्मि।)

गणिका- गच्छदु अय्यो सुहिज्जणदंसणेण पीदिं णिव्वत्तेदुं। (गच्छत्वार्यः सुहृज्जनदर्शनेन प्रीतिं निर्वर्तयितुम्।)

संवाहकः- अज्ज एव कदाइ णिव्वेदेण पव्वजेअं। जइ इअं परिअणे सङ्कन्ता कळा भवे, तदो अय्याए अणुग्गहिदो भवेअं। (अद्यैव कदाचिन्निर्वेदेन प्रव्रजेयम्। यदीयं परिजने सङ्क्रान्ता कला भवेत्, तत आर्ययानुगृहीतो भवेयम्।)

गणिका- जस्स किदे इअं कळा सिक्खिदा, सो एव्व अय्येण उवचिट्ठिदव्वो भविस्सदि। (यस्य कृते इयं कला शिक्षिता, स एवार्येणोपस्थातव्यो भविष्यति।)

संवाहकः- (स्वगतम्) णिउणं खु पच्चाचक्खिदो म्हि। को हि णाम अप्पणा किदं पच्चुअआरेण विणासेदि। (प्रकाशम्) अय्ये! गच्छामि दाव अहं। (निपुणं खलु प्रत्याख्यातोऽस्मि। को हि नामात्मना कृतं प्रत्युपकारेण विनाशयति। आर्ये! गच्छामि तावदहम्।)

गणिका- गच्छदु अय्यो पुणो दंसणाअ। (गच्छत्वार्यः पुनर्दर्शनाय।)

संवाहकः- अय्ये! तह। (निष्क्रान्तः।) (आर्ये! तथा।)

गणिका- हं, सद्दो विअ। (हं शब्द इव।)

चेटः- विच्छित्तिए! विच्छित्तिए! कहिं कहिं अज्जुआ। (विच्छित्तिके! विच्छित्तिके! कुत्र कुत्राज्जुका।)

गणिका- हञ्जे! किं एदं। (हञ्जे! किमेतत्।)

चेटः- हं, विप्पळद्धो म्हि, वादाअणणिक्खामिदपुव्वकाआए ओणमिअपओहराए कृण्णऊरस्स परिप्फन्दो अज्जुआए जेण ण दिट्ठो। (हं, विप्रलब्धोऽस्मि, वातायननिष्क्रमितपूर्व-काययावनमितपयोधरया कर्णपूरस्य परिस्पन्दोऽज्जुकया येन न दृष्टः।)

गणिका- ळहुजणस्स सुळहो विम्हओ। किं दे उस्सेअस्स कारणम्। (लघुजनस्य सुलभो विस्मयः। किं ते उत्सेकस्य कारणम्।)

चेटः- सुणादु अज्जुआ-एसो उग्गवेगेण ओगाहणणिव्वत्तिदेण पुस्सुदमदगन्धं राअमग्गं करन्तेण मङ्गळहत्थिणा भद्दकवोदएण अणेअपुरुससङ्कुळेसु राअमग्गेसु उत्तरिअपडविराअदाए अहिअळक्खणीओ कोच्चि पव्वइदो समासादिदो। (शृणोत्वज्जुका-एष उग्रवेगेनावगाहननिर्वर्तितेन प्रस्रुतमदगन्धं राजमार्गं कुर्वता मङ्गलहस्तिना भद्रकपोतकेनानेकपुरुषसङ्कुलेषु राजमार्गेषूत्तरीयपटविरागतयाधिकलक्षणीयः कश्चित् प्रवजितः समासादितः।)

गणिका- हं, तदो तदो। (हं, ततस्ततः।)

चेटः- तदो मए हत्थिहत्थामिद्दताडिअमाणो दन्तन्तरपरिवत्तमाणो हत्थिहत्थपडिदचरणो तदो हा हा विपाडिदो हा हा हदोत्तिजणवादे संवुत्ते तदो दिण्णकरप्पहारेण परिवत्तिदं हत्थिं करिअ मोइदो सो परिव्वाजो। (ततो मया हस्तिहस्तामर्दताड्यमानो दन्तान्तरपरिवर्तमानो हस्तिहस्तपतितचरणः ततो हा हा विपाटितो हा हा हत इति जनवादे संवृत्ते ततो दत्तकरप्रहारेण परिवर्तितं हस्तिनं कृत्वा मोचितः स परिव्राट्।)

गणिका- पिअं मे। तदो तदो। (प्रियं मे। ततस्ततः।)

चेटः- तदो सव्वो जणो भणादि- अहो चेडस्स कम्म त्ति। ण उण कोच्चि किं पि इच्छइ दाउं। तदो अज्जुए! केण वि कुळवुत्तेण उइदाणि आभरणट्ठाणाणि विळोइअ अङ्गुट्ठेणाणिअ वि उण अळद्धं पेक्खिअ दव्वं उवाळभिअ दिग्घं णिस्ससिअ एत्तओ मे विभवो त्ति करिअ परिजणहत्थे अअं पावरओ पेसिदो। (ततः सर्वो जनो भणति-अहो चेटस्य कर्मेति। न पुनः कश्चित् किमपीच्छति दातुम्। ततोऽज्जुके! केनापि कुलपुत्रेणोचितान्याभरणस्थानानि विलोक्याङ्गुष्ठेनानीयापि पुनरलब्धं प्रेक्ष्य दैवमुपालय दीर्घं निःश्वस्यैतावान् मे विभव कृत्वा परिजनहस्तेऽयं प्रावारकः प्रेषितः।)

गणिका- को णु खु अय्यचारुदत्तस्स गुणाणि अणुकरेदि। (को नु खल्वार्यचारुदत्तस्स गुणाननुकरोति।)

चेटी- अज्जुए! मम वि कोदूहळं अत्थि। को णु खु एसो। (अज्जुके! ममापि कौतूहगलमस्ति। को नु खल्वेषः।)

गणिका- केण वि साहुणा पुरूसेण होदव्वं। (केनापि साधुना पुरुषेण भवितव्यम्।)

चेटी- साहु पुच्छीअदु दाव। (साधु पृच्छयतां तावत्।)

गणिकाः- हञ्जे! एकपुरुसपक्खवादिदा सव्वगुणाणि हन्ति। (हञ्जे! एकपुरुषपक्षपातिता सर्वगुणान् हन्ति।)

चेटी- भद्द! से णाम तुवं जाणासि। (भद्र! अस्य नाम त्वं जानासि।)

चेटः- ण हु जाणामि। (न खलु जानामि।)

गणिका- अदिळहु किदं। (अतिलघु त्वया कृतम्।)

चेटी- जइ एवं, इह तुए को त्ति मन्तिदं। (यद्येवम्, इह त्वया क इति मन्त्रितम्।)

चेटः- अहं एत्तअं तु जाणामि-भद्दओ अविम्हओ त्ति। (अहमेतावत् तु जानामि-भद्रकोऽविस्मय इति।)

गणिका- एहि दाव तं पेक्खामो। (एहि तावत् तं पश्यामः।)

चेटः- पेक्खदु पेक्खदु अज्जुआ। एसो गच्छइ। (पश्यतु पश्यत्वज्जुका। एष गच्छति।)

गणिका- (प्रासादाद् विलोक्य) हञ्जे! एसो हि सो अय्यचारुदत्तो एव्व जण्णोववीदमत्तपावरओ गच्छइ। ता जाव दूरं गओ ण भविस्सदि एसो, पेक्खम्ह दाव णं। (हञ्जे! एष हि स आर्यचारुदत्त एव यज्ञोपवीतमात्रप्रावारको गच्छति। तद् यावद् दूरं गतो न भविष्यत्येष, पश्यामस्तावदेनम्।)

(निष्क्रान्ताः सर्वे।)

द्वितीयोऽङ्कः।

अथ तृतीयोऽङ्कः।

(ततः प्रविशति नायको विदूषकश्च।)

नायकः- वयस्य! वीणा नामासमुद्रोत्थितं रलम्। कुतः,

उत्कण्ठितस्य हृदयानुगता सखव
सङ्कीर्णदोषरहिता विषयेषु गोष्ठी।
क्रीडारसेषु मदनव्यसनेषु कान्ता
स्त्रीणां तु कान्तरतिविघ्नकरी सपली ।। १ ।।

विदूषकः- भो वयस्स! को काळो किदपरिघोषणदाए णिस्सम्पादा राअमग्गा। कुक्खुरा वि ओसुत्ता। वअं णिद्दं ण ळभामो। अण्णं च दाणि अच्छरीअं. इमं हदवीणं ण रमाभि। अहिअदिढत्थाणे विच्छिण्णतन्तिआ होदु। (भो वयस्य! कः कालः कृतपरिघोषणतया निःसम्पाता राजमार्गाः। कुक्कुरा अप्यवसुप्ताः। वयं निद्रां न लभामहे। अन्यच्चेदानीमाश्चर्यम्। इमां हतवीणां न रमे। अधिकदृढस्थाने विच्छिन्नतन्त्रीका भवतु।)

नायकः- वयस्य! भावशाबलेन बहुशः खल्वद्य मधुरं गीतम्। न च भवान् रमते।

विदूषकः- अदो एव्व एदं रामाभि। महुरं पि बहुखादिअं अजिण्णं होइ। (अत एवैतामहं न रमे। मधुरमपि बहु खादितम्जीर्णं भवति।)

नायकः- सर्वथा सुव्यक्तं गीतम्। कुतः,

रक्तं च तारमधुरं च समं स्फुटं च
भावर्पितं च न च साभिनयप्रयोगम्।
किं वा प्रशस्य विविधैर्बहु तत्तदुक्त्वा
भित्त्यन्तरं यदि भवेद् युवतीति विद्याम् ।। २ ।।

विदूषकः- कामं पसंसेदु भवं। मम खु दाव गाअन्तो मणुस्सो इत्थिआ वि पठन्ती उभअं आदरं ण देदि। गाअन्तो दाव मणुस्सो रत्तसुमणावेट्ठिदो विअ पुरोहिदो दिढं ण सोहइ। इत्थिआ वि पठन्ती छिण्णणासिआ विअ धेणुआ अदिविरूवा होइ। (कामं प्रशंसतु भवान्। मम खलु तावद् गायन् मनुष्यः स्त्र्यपि पठन्त्युभयमादरं न ददाति। गायंस्तावन्मनुष्यो रक्तसुमनोवेष्टित इव पुरोहितो दृढं न शोभते। स्त्र्यपि पठन्ती छिन्ननासिकेव धेनुरतिविरूपा भवति।)

नायकः- सखे! उपारुढोऽर्धरात्रः। स्थिरतिमिरा राजमार्गाः। निस्सम्पातपुरुषत्वात् प्रसुप्तेवोज्जयिनी प्रतिभाति। कुतः,

असौ हि दत्त्वा तिमिरावकाशमस्तं गतो ह्यष्टमपक्षचन्द्रः।
तेयावगाढस्य वनद्विपस्य विषाणकोटीव निमज्जमाना ।। ३ ।।

विदूषकः- सुट्ठु भवं भणादि। अन्तद्धिअमाणचन्दळद्धावआसो ओदरदी विअ पासादादो अन्धआरो (सुष्ठु भवान् भणति। अन्तर्दधानचन्द्रलब्धावकाशोऽवतरतीव प्रासादादन्धकारः।)

नायकः- (परिक्रम्य) इदमस्मदीयं गृहम्। वर्धमानवक! वर्धमानवक!

विदूषकः- वद्धमाणवअ! वद्धमाणवअ! दुवारं अवावुद। (वर्धमानवक! वर्धमानवक! द्वारमपावृणु।)

(प्रविश्य)

चेटः- अम्मो अय्यमेत्तेओ। (अम्मो आर्यमैत्रेयः।)

नायकः- वर्धमानवक!

चेटः- अम्मो भट्टिदारओ। भट्टिदारअ! वन्दामि। (अम्मो भर्तृदारकः। भर्तृदारक! वन्दे।)

नायकः- पादोदकमानय।

चेटः- (परिक्रम्य) इदं पादोदअं। (नायकस्य पादौ प्रक्षालयति।) (इदं पादोदकम्।)

विदूषकः- वड्ढमाणवअ! मम वि पादं पक्खाळेहि। (वर्धमानवक! ममापि पादं प्रक्षालय।)

चेटः- सुहोदेसु पादेसु भूमीए पळोट्ठिदव्वं। उदअं विणासेहि। अहव आणेहि। पक्खाळइस्सं। (नाट्येन विदूषकस्य पादौ प्रक्षालयति। (सुधौतयोः पादयोर्भूम्यां प्रलोठितव्यम्। उदकं विनाशय। अथवानय। प्रेक्षालयिष्यामि।)

विदूषकः- ण केवळं दासीएपुत्तेण पादा धोदा, मुहं वि धोदं। (न केवलं दास्याः पुत्रेण पादौ धौतौ, मुखमपि धौतम्।)

नायकः- वयस्य!

इयं हि निद्रा नयनावलम्बिनी
ललाटदेशादुपसर्पतीव माम्।
अदृश्यमाना चपला जरेव या
मनुष्यवीर्यं परिभूय वर्धते ।। ४ ।।

मैत्रेय! सुप्यताम्।

(निष्क्रान्तश्चेटः।)

(प्रविश्याभरणसमुद्गहस्ता।)

चेटी- अय्यमेत्तेअ! उट्ठेहि उट्ठेहि। (आर्यमैत्रेय! उत्तिष्ठोत्तिष्ठ।)

विदूषकः- भोदि ! किं एदं। (भवति! किमेतत्।)

चेटी- इअं सुवण्णभण्डं सट्ठीए सत्तमीए परिवेट्टामि। अट्ठमी खु अज्ज। (इदं सुवर्णभाण्डं षष्ठ्यां सप्तम्यां परिवर्तयामि। अष्टमी खल्वद्य।)

नायकः- इदं तद् वसन्तसेनायाः स्वकम्।

चेटी- आम। भणादु भणादु भट्टिदारओ, गण्हदु त्ति। (आम। भणतु भणतु भर्तृदारकः गृह्णत्विति।)

नायकः - मैत्रेय! गृह्यताम्।

विदूषकः - किं णिमित्तं अअं अळङ्कारो अब्भन्तरचउस्साळं ण प्पवेसीअदि। (किन्निमित्तमयमलङ्कारोऽभ्यन्तरचतुःशालं न प्रवेश्यते।)

नायकः - मूर्ख! बाह्यजनधारितमलङ्कारं गृहजनो न द्रक्ष्यति।

विदूषकः - का गई! आणेहि गण्हामि चोरेहिं गण्हिअमाणं। (का गतिः। आनय गृह्णामि चौरैर्ह्यमाणम्।)

विदूषकः - भो! किं णिमित्तं सो पावरओ तस्स गणिआपरिआरअस्स दिण्णो। (भोः! किन्निमित्तं स प्रावारकस्तस्मै गणिकापरिचारकायदत्तः।)

नायकः - सानूक्रोशतया।

विदूषकः - इह वि साणुक्कोसदा! (इहापि सानुक्रोशता।)

नायकः - वयस्य! मा मैवम्।

विदूषकः - अहं भरिदगद्दमो विअ भूमीए पळोट्ठामि। (अहं भरितगर्दभ इव भूम्यां प्रलुठामि।)

नायकः - निद्रा मां बाधते। तूष्णीं भव।

विदूषकः - सअदु भवं सुहप्पबोहाअ। जाव अहं पि सुविस्सं। शेतां भवान् सुखप्रबोधाय। यावदहमपि स्वप्स्यामि।)

(द्वावपि स्वपितः।)

(ततः प्रविशति सज्जलकः।)

सज्जलकः - एष भोः।

कृत्वा शरीरपरिणाहसूखप्रवेशं
शिक्षाबलेन च बलेन च कर्ममार्गमे।
गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः।।५।।

भोः। वृक्षवाटिकापक्षद्वारे सन्धिं छित्वा प्रविष्टोऽस्मि। यावदिदानीं चतुःशालमुपसर्पामि। (सनिर्वेदं विचिन्त्य)भोः

कामं नीचमिदं वदन्तु विबुधाः सुप्तेषु यद्वर्तते
विश्वस्तेषु हि वञ्चनापरिभवः शौर्यं न कार्कश्यता।
स्वाधीना वचनीयतापि तु वरं बद्धो न सेवाञ्जलि-
र्मार्गश्चैष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ।। ६ ।।

(विचिन्त्य)

लुब्धोऽर्थवान् साधुजनावमानी वणिक् स्ववृत्तावत्तिकर्कशश्च।
यस्तस्य गेहं यदि नाम लप्स्ये भवामि दुःखोपहतो

यद्वा तद्वा भवतु। किं वा न कारयति मन्मथः। यावदारभे कर्म। भोः !

देशः को नु जलावसेकशिथिलश्छेदादशब्दो भवेद्
भित्तीनां क्व नु दर्शितान्तरसुखः सन्धिः करालो भवेत्।
क्षारक्षीणतया चलेष्टककृशं हर्म्यं क्व जीर्णं भवेत्
कुत्र स्त्रीजनदर्शनं च न भवेत् स्वन्तश्च यत्नो भवेत् ।। ८ ।।

(परिक्रम्य) इयं वास्तुविभागक्रिया। सोपस्नेहतया गृहविशिष्ट इवायं भवनविन्यासः। इह तावत् प्रवेशावकाशं करिष्ये। भोः! कीदृश इदानीं सन्धिच्छेदः कर्तव्यः स्यात्।

सिंहाक्रान्तं पूर्णचन्द्रं झषास्यं
चन्द्रार्धं वा व्याघ्रवक्त्रं त्रिकोणम् ।
सन्धिच्छेदः पीठिका वा गजास्य-
मस्मत्पक्ष्या विस्मितास्ते कथं स्युः ।। ९ ।।

भवतु, सिंहाक्रान्तमेव च्छेदयिष्ये ।

विदूषकः- भो! जागत्ति खु भवं, णहि। (भोः ! जागार्ति खलु भवान्, नहि।)

नायकः- किमर्थम्।

विदूषकः- अहं खु दाव कत्तव्वकरत्थीकिदसङ्केदो विअ सक्किअसमणओणिद्दं णळभामि। वामं खु मे अक्खि फन्देदि। चोरो सन्धिं छिन्ददी विअ पेक्खामि। जइ ईदिसी अवत्था अत्थाणं, जादीए दरिद्दो एव्व होमि। (अहं खलु तावत् कर्तव्यकरस्त्रीकृतसङ्केत इव शाक्यश्रमणको निद्रां न लभे। वामं खलु मेऽक्षि स्पन्दते। चोरः सन्धिंछिनत्तीव पश्यामि। यदीदृश्यवस्थार्थानां, जात्या दरिद्र एव भवामि।)

नायकः- मूर्ख! धिक् त्वाम्। दारिद्र्यमभिलषसि।

सज्जलकः- अथ केनेदानीं सन्धिच्छेदमार्गः सूचयितव्यः स्यात्। नन्विदं दिवा ब्रह्मसूत्रं रात्रौ कर्मसूत्रं भविष्यति।

अद्यास्य भित्तिषु मया निशि पाटितासु
छेदात् समासु सकृदर्पितकाकलीषु।
काल्यं विषादविमुखः प्रतिवेशवर्गो
दोषांश्च मे वदतु कर्मसु कौशलं च ।। १० ।।

नमः खरपटाय । नमो रात्रिगोचरेभ्यो देवेभ्यः। (तथा करोति।)

हन्त अवसितं कर्म। प्रविशामस्तावत्। (प्रविश्य) अये! ज्वलति दीपः। अपसरामि तावत्। धिक्, सज्जलकः खल्वहम्।

मार्जारः प्लवने वृकोऽपसरणे श्येनो गृहालोकने
निद्रा सुप्तमनुष्यवीर्यतुलने संसर्पणे पन्नगः।

माया वर्णशरीरभेदकरणे वाग् देशभाषान्तरे
दीपो रात्रिषु सङ्कटे च तिमिरं वायुः स्थले नौर्जले ।। ११ ।।

(सर्वतो विलोक्य) आगन्तुकत्वादविदितसमृद्धिविस्तरः केवल भवनप्रत्ययादिह प्रविष्टोऽस्मि। न चेदानीं किञ्चित् परिच्छदविशेषं पश्यामि। किन्नु खलु दरिद्र एवायम्। उताहो अयं संयमननिरर्थकं द्रष्टव्यं धारयति। अथवा, अभिजातोऽयं भवनविन्यासः। उपभुक्तप्रनष्टविभवेनानेन भवितव्यम्।

तथा विभवमन्दोऽपि जन्मभूमिव्यपेक्षया।

गृहं विक्रयकालेऽपि नीलस्नेहेन रक्षति।। १२ ।।

भवतु पश्यामस्तावत्। अथवा, न खलु मे तुल्यावस्थः कुलपुत्रः पीडयितव्यः। गच्छामि तावत्।

विदूषकः- भो! गण्ह एदं सुवण्णभण्डअं। (भो! गृहाणैतत् सुवर्णभाण्डम्।)

सज्जलकः- कथं सुवर्णभाण्डमित्याह। किं मां दृष्ट्वाभिभाषते। आहोस्वित् सत्त्वलाघवात् स्वप्नायते। भवतु पश्यामस्तावत्। (दृष्ट्वा) भूतार्थं सुप्त एवायम्। तथाहि,

निश्वासोस्य न शङ्कित्तो न विषमस्तुल्यान्तरं जायते
गात्रं सन्धिषु दीर्घतामुपगतं शय्याप्रमाणाधिकम्।
दृष्टिर्गाढनिमीलिता न चपलं पक्ष्मान्तरं जायते
दीपं चैव न मर्षयेदभिमुखः स्याल्लक्षसुप्तो यदि।। १३ ।।

क्व नु खलु तत्। अये जर्जरप्रावरणैकदेशे दीपप्रभाव्यक्तीकृतरूपं दृश्यते। सुपरिगृहीतमनेन। अयमत्र प्राप्तकालः इमे मया गृहीताः शलभाः दीपनिर्वापणार्भमेकं मुञ्चामि। (भ्रमरकरण्डकादेकं मुञ्चति।) अये एष दीपं निर्वाप्य पतति।

विदूषकः- अविहा णिव्वाविदो दीवो दाणिं। मुसिदो म्हि। भो चारुदत्त! गण्ह एदं सुवण्णाळङ्कारं। अहं खु भीदीए उप्पहप्पवुत्तो विअ वणिजो णिद्दं ण ळभामि। मम बम्हत्तणेण साविदो सि, जइ ण गण्हसि। (अविहा निर्वापितो दीप इदानीम्। मुषितोऽस्मि। भोश्चारुदत्त! गृह्णेमं सुवर्णालङ्कारम्। अहं खलु भीत्योत्पथप्रवृत्त इव वणिग् निद्रां न लभे। मम ब्रह्मत्वेन शापितोऽसि यदि न गृहणासि।)

सज्जलकः- किमत्र शपथपरिग्रहेण। एष प्रतिगृह्णामिय़ (गृहणाति।)

विदूषकः- (दत्त्वा) अहं विक्किणिदभण्डओ विअ वणिजओ सुहं सइस्सं। (अहं विक्रीतभाण्ड इव वणिक् सुखं शयिष्ये।)

सज्जलकः- सुखं स्वपिहि महाब्राह्मण!। (विचिन्त्य) भोः! ब्राह्मणेन विश्वासाद् दीयमानं हर्तव्यमासीत्

धिगस्तु खलु दारिद्र्यमनिर्वेदं च यौवनम्।
यदिदं दारुणं कर्म निन्दामि च करोमि च ।। १४ ।।

(नेपथ्ये पटहशब्दः क्रियते।)

सज्जलकः- (कर्णं दत्त्वा) अये प्रभातसमयः संवृत्तः। अपसरामि तावत्।)

(निष्क्रान्ताः सज्जलकः ।)

(प्रविश्य)

चेटी- (साक्रन्दम्) अय्यमेत्तेअ! अम्हाणं रुक्खवाडिआपक्खदुवाळे सन्धिं छिन्दिअ चोरो पविट्ठो। (आर्यमैत्रेय! अस्माकं वृक्षवाटिकापक्षद्वारे सन्धिं छित्वा चोरः प्रविष्टः।)

विदूषकः- (सहसोत्थाय) किं भणादि होदी। (किं भणति भवती।)

(चेटी रुक्खवाडिअत्ति पठति।)

विदूषकः- चोरंछिन्दिअ सन्धी पविट्ठो। (चोरं छित्वा सन्धिः प्रविष्टः।)

चेटी- हदास! सन्धिं छिन्दिअ चोरो पविट्ठो। (हताश! सन्धिं छित्वा चोरः प्रविष्टः।)

विदूषकः- आअच्छ णं दंसेहि। (आगच्छ ननु दर्शय।)

चेटी- (परिक्रम्य) एदं। (एतत् ।)

विदूषकः- अविहा दासीएवुत्तेण कुक्कुरेण पवेसो किदो। भोदि! आअच्छ, चारुदत्तस्स पिअं णिवेदेमि।

(उबावुपगम्य)

भो चारुदत्त! पिअं दे णिवेदेमि।

(अविहा दास्याः पुत्रेण कुक्कुरेण प्रवेशः कृतः। भवति! आगच्छ चारुदत्तस्य प्रियं निवेदयामि। भोश्चारुदत्त! प्रियं ते निवेदयामि।)

नायकः- (वुद्ध्वा) किं मे प्रियम्। ननु वसन्तसेना प्राप्ता।

विदूषकः- ण खु वसन्तसेणा, वसन्तसेणो पत्तो । (न खलु वसन्तसेना, वसन्तसेनः प्राप्तः।)

नायकः- रदनिके। किमेतत्।

चेटी- भट्टिदारअ! अम्हाणं रुक्खवाडिआपक्खदुवारे सन्धि छिन्दिअ चोरो पविट्ठो। (भर्तृदारक! अस्माकं वृक्षवाटिकापक्षद्वारे सन्धि छित्वा चोरः प्रविष्टः।)

नायकः- किं चोरः प्रविष्टः।

विदूषकः- भो वअस्स! सव्वहा तुवं भणासि, मुक्खो मेत्तेओ अपण्डिदो मेत्तेओ त्ति। णं मए सोभणं किदं तं सुवण्णभण्डअं तव हत्थे समप्पअन्तेण। (भो वयस्य! सर्वथा त्वं भणसि, मूर्खो मैत्रेयोऽपण्डितो मैत्रेय इति। ननु मया शोभमं कृतं तत् सुवर्णभाण्डकं तव हस्ते समर्पयता।)

नायकः- किं भवता दत्तम्।

विदूषकः- अहइं । (अथ किम्।)

नायकः- कस्यां वेलायाम्?

विदूषकः- अद्धरत्ते। (अर्धरात्रे।)

नायकः- किमर्धरात्रे बाढं दत्तम्।

विदूषकः- भो चारुदत्त! जं वेळं पडिबुद्धो आसि, तस्सि वेळाअं खु दिण्णं। (भोश्चारुदत्त! यस्यां वेलायां प्रतिबुद्ध आसीः तस्यां वेलायां खलु दत्तम्।)

नायकः- हन्त हृतं सुवर्णभाण्डकम्।

विदूषकः- दाणिं मे हत्थे पडिच्छिदु अत्तभवं। (इदानीं मम हस्ते प्रयच्छत्वत्रभवान्।)

नायकः- (आत्मगतम्)

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति।
शङ्कनीया हि दोषेषु निष्प्रभावा दरिद्रता ।। १५ ।।

(प्रविश्य)

ब्राह्मणी- रदणिए! रदणिए! आअच्छ । णहि सुणादि । कवाडसद्दं दाव करिस्सं । (तथा करोति।) रदनिके! रदनिके! आगच्छा । नहि शृणोति । कवाटशब्दं तावत् करिष्यामि ।)

चेटी- हं, कवाडसद्दो विअ। भट्टिदारिआ मं सद्दावेदि । परिक्रम्य) भट्टिदारिए! अअम्हि। (हं कवाटशब्द इव। भर्तृदारिका मां शब्दापयति। भर्तृदारिके! इयमस्मि।)

ब्राह्मणी- ण परिक्खदो ण वावादिदो अय्यउत्तो अय्यमेत्तेओ वा । (न परिक्षतो न व्यापादित आर्यपुत्र आर्यमैत्रेयो वा।)

चेटी- कुसळी भट्टिदारओ अय्यमेत्तेओ अ । जो तस्स जणस्स अळङ्गरो चोरेण गहीदो। (कुशली भर्तृदारक आर्यमैत्रेयश्च। यस्तस्य जनस्यालङ्कारश्चोरेण गृहीतः।)

ब्राह्मणी- किं भणासि चोरेण गहीद त्ति। (किं भणसि चोरेण गृहीत इति।)

चेटी- अह इं । (अथ किं।)

ब्राह्मणी- किण्णु खु तस्स जणस्स दादव्वं भविस्सदि। अहव एदं दइस्सं। (कर्णो स्पृष्ट्वा) हद्धि ताळीपत्तं खु एदं। सो दाणि परिअओ मं विळम्बेदि। किं दाणि करिस्सं। (विचिन्त्य) भोदु, दिट्ठं। मम ञ्आदिकुळादो ळद्धा सदसहस्समुळ्ळा मुत्तावळी। तं पि अय्यउत्तो सोढीरदाए पडिच्छदि। भोदु, एवं दाव करिस्सं। (निष्क्रान्ता) (किन्नु खलु तस्मै जनाय दातव्यं भविष्यति। अथवैतद् दास्यामि। हा धिक् तालीपत्रं खल्वेतत्। स इदानीं परिचयो मां विडम्बयति। किमिदानीं करिष्यामि। भवतु, दृष्टम्। मम ज्ञातिकुलाद् लब्धा शतसहस्रमूल्या मुक्तावली। तामप्यार्यपुत्रः शौटीरतया प्रतीच्छति। भवतु, एवं तावत् करिष्यामि।)

विदूषकः- इमस्स अन्धआरुप्पादिदस्स अवराहस्स किदे भवन्तं सीसेण पसादेमि। दाणिं मे हत्थे पडिच्चदु अत्तभवं। (अस्यान्धकारोत्पादितस्यापराधस्य कृते भवन्तं शीर्षेण प्रसादयामि। इदानीं मे हस्ते प्रयच्छत्वत्रभवान्।)

नायकः- किं भवानिदानीं मा बाधते।

भवांस्तावदविश्वासी शीलज्ञो मम नित्यशः ।
किं पुनः स कलाजीवी वञ्चनापण्डितो जनः ।। १६ ।।

विदूषकः- मण्णे मए मन्दभग्गेण कुम्भीळस्स हत्थे दिण्णं। (विषण्णस्तिष्ठति।) मन्ये मया मन्दभाग्येन कुम्भीलस्य हस्ते दत्तम्।)

(प्रविश्य)

ब्राह्मणी- रदणिए! अय्यमेत्तेअं सद्दावेहि। (रदनिके! आर्यमैत्रेयं शब्दापय।)

चेटी- अय्यमेत्तेअ! भट्टिदारिआ तुमं सद्दावेदि। (आर्यमैत्रेय! भर्तृदारिका त्वां शब्दापयति।)

विदूषकः- भोदि! किं मं। (भवति! किं माम् ।)

चेटी- आम । (आम।)

विदूषकः- एस आअच्छामि। (उपसर्पति।) (एष आगच्छामि।)

ब्राह्मणी- अय्यमेत्तेअ! इमं पडिग्गहं पडिगण्ह। (आर्यमैत्रेय! इमं प्रतिग्रहं प्रतिगृहाण।)

विदूषकः- अवत्थाविरुद्धो खु अअं पदाणविभवो। कुदो एदस्स आगमो। (अवस्थाविरुद्धः खल्वयं प्रदानविभवः। कुत एतस्यागमः।)

ब्राह्मणी- णं सट्ठिं उववसामि। सव्वसारविभवेण बम्हणेण सोत्थि वाअइदव्वं ति एसो इमस्स आगमो। (ननु षष्ठीमुपवसामि। सर्वसारविभवेन ब्राह्मणेन स्वस्ति वाचयितव्यमित्येषोऽस्यागमः।)

विदूषकः- अट्ठमी अज्ज। (अष्टमी खल्वद्य ।)

ब्राह्मणी- पमादादो अदिक्कमो किदो। अज्ज पूआ णिव्वत्तीअदि। (प्रमादाद् अतिक्रमः कृतः। अद्य पूजा निवर्त्यते।)

विदूषकः- अणणुरूवदाए पदाणस्स अणुक्कोसो विअ पडिभादि। (जनान्तिकम्) रदणिए! किं करिस्सं। (अननुरूपतया प्रदानस्यानुक्रोश इव प्रतिभाति। रदनिके! किं करिष्यामि।)

चेटी- (अपवार्य) किंणु खु तस्स जणस्स दादव्वं भविस्सदि त्ति एदण्णिमित्तं भट्टिदारओ सन्तप्पदि त्ति भट्टिदारिआ तव हत्थे दइअ अय्यउत्तं अणिरिणं करिस्सामि त्तिं एवं करेदि। ता गुण्ह एदं। (किन्नु खलु तस्मै जनाय दातव्यं भविष्यतीत्येतन्निमित्तं भर्तृदारकः संतप्यत इति भर्तृदारिका तव हस्ते दत्त्वार्यपुत्रमनृणं करिष्यामीत्येवं करोति। तद् गृहाणैतत्।)

ब्राह्मणी- उदअसम्भवदाए मुत्तावळीए तव अ दुळ्ळहदाए उवआरो विस्सरिदो। गण्ह एदं। (ददाति।) (उदकसम्भवतया मुक्तावल्यास्तव च दुर्लभतयोचारो विस्मृतः। गृहाणैतत्।)

विदूषकः- (गृहीत्वा) सव्वं दाव चिट्ठदु। रोदिदी विअ होदीए दिट्ठि। (सर्वं तावत् तिष्ठतु । रोदितीव भवत्या दृष्टिः।)

ब्राह्मणी- देवउळधूमेण रोदाविदा। (देवकुलधूमेन रोदिता।)

विदूषकः- साविदामि तत्तहोदा चारुदत्तेण, जइ अळिअं भणसि। (शापितासि तत्रभवता चारुदत्तेन यद्यलीकं भणसि।)

ब्राह्मणी- हद्धि। (निष्क्रान्ता।) (हा धिक्।)

विदूषकः- एसा वाआए दुक्खं रक्खिअ अस्सूहि सूइअ गआ। (उपगम्य) भो! इदं। (एषा वाचा दुःखं रक्षित्वाऽश्रुभिः सूचयित्वा गता-। भोः! इदम्।)

नायकः- किमेतत्।

विदूषकः- सरिसकुळदारसङ्गहस्स फलं । (सदृशकुलदारसंग्रहस्य फलम्।)

नायकः- किं ब्राह्मणी मामनुकम्पते।

विदूषकः- एवं विअ। (एवमिव।)

नायकः- धिगात्मानम् । अद्य हतोऽस्मि।

मयि द्रव्यक्षयक्षीणे स्त्रीद्रव्येणानुकम्पितः।
अर्थतः पुरुषो नारी या नारी सार्थतः पुमान् ।। १७ ।।

विदूषकः- तत्तहोदी हिअएण तुमं याटेदि। अहं सीसेण याचेमि। गण्ह एदं। (तत्रभवती हृदयेन त्वां याचते। अहं शीर्षेण याचे। गृहाणैतत् ।)

नायकः- तथा। (गुहीत्वा) वयस्य! इमां मुक्तावलीं गृहीत्वा वसन्तसेनायाः सकाशं गच्छ।

अर्थेषु काममुपलभ्य मनोरथो मे
स्त्रीणां धनेष्वनुचितं प्रणयं करोति।
माने च कार्यकरणे च विलम्बमानो
धिग् भोः! कुलं च पुरुषस्य दरिद्रतां च ।। १८ ।।

विदूषकः- अहो अप्पमुळ्ळस्स सुवण्णभण्डअस्स किदे सदसहस्समुळ्ळा मुत्तावळी णीआदइदव्वा। (अहो अल्पमूल्यस्य सवर्णभाण्डकस्य कृते शतसहस्त्रमूल्या मुक्तावली निर्यातयितव्या)

नायकः- वयस्य! मा मैवम्।

यं समालक्ष्य विश्वासं न्यासोऽस्मासु कृतस्तया ।
तस्यैतन्महतो मूल्यं प्रत्ययस्य प्रदीयताम् ।। ११ ।।

(निष्क्रान्ताः सर्वे।)
तृतीयोऽङ्कः ।

अथ चतुर्थोऽङ्कः।
(ततः प्रविशति सोत्कण्ठा वसन्तसेना, चित्रफलकमादाय वर्तिकाकरण्डहस्ता चेटी च।)

गणिका- हञ्जे! पेक्खसि सरिसो तस्स जणस्स। (हञ्जे! पश्यसि सदृशस्तस्य जनस्य।)

चेटी- अज्जुए! तस्सिं हत्थिमिमद्दकोळाहळे बहुमाणपय्यत्थाए दिट्ठिए दूरदे दिट्ठो सो भट्टिदारओ ईदिसो एव्व। (अज्जुके! तस्मिन् हस्तिविमर्दकोलाहले बहुमानपर्यस्तया दृष्ट्या दूरतो दृष्टः स भर्तृदारक ईदृश एव ।)

गणिका- तुमं दाव दक्खो वेसवासजणो त्ति जणवादं पूरअन्ती अळिअं भणासि। (त्वं तावद् दक्षो वेशवासजन इति जनवादं पूरयन्त्यलीकं भणसि।)

चेटी- किं एदं वेसवासजणो सव्वो दक्खिणो होइ त्ति। पेक्खदु अज्जुआ, चम्पआरामे पिचुमन्दा जाअन्ति। अदिसरिस त्ति मम हिअअं अहिरमदि। परमत्थदो एव्व पसंसीअदि, णं कामदेवी। (किमेतद् वेशवासजनः सर्वो दक्षिणो भवतीति। पश्यत्वज्जुका, चम्पकारामे पिचुमन्ता जायन्ते। अतिसदृश इति मम हृदयमभिरमते। परमार्थत एव प्रशस्यते, ननु कामदेवः।)

गणिका- हञ्जे! सहीजणेण अवहसणीअत्तणं अत्तणो परिहरामि। (हञ्जे! सखीजनेनापहसनीयत्वामात्मनः गणिकाजनो नाम।)

(ततः प्रविशत्याभरणहस्ताऽपरा चेटी।)

चेटी- सुहं अज्जुआए। (सुखमज्जुकायाः।)

गणिका- हञ्जे! साअदं दे। (हञ्ज! स्वागतं ते।)

चेटी- अज्जुए! अत्ता आणवेदि-इदं दुवारं पविट्ठं पोक्खरं उवावत्तिदं पहवणं। ता तुवरमाणमण्डणा गहीदावउण्ठणा आअच्छदुत्ति। इह अळङ्कारं अळङ्करेदु अज्जुआ। (अज्जुके! अम्बाज्ञापयति- इदं द्वारं प्रविष्टं पौष्करमुपावर्तितं प्रवहणम्। तत् त्वरमाणमण्डना गृहीतावगुण्ठनागच्छत्विति। इहालङ्करोत्वज्जुका।)

गणिका- किं अय्यचारुदत्तो मण्डइस्सिदि। (किमार्यचारुदत्तो मण्डयिष्यति।)

चेटी- णहि, जेण अळङ्कारो पेसिदो सो राअसाळो सण्ठाणो । (न हि, येनालङ्कारः प्रेषितः स राजस्यालः संस्थानः।)

गणिका- अवेहि अविणीदे। (अपेह्यविनीते।)

चेटी- पसीददु पसीददु अज्जुआ। सन्देसं खु अहं मन्तेमि। (पादयोः पतति।) (प्रसीदतु प्रसीदत्वज्जुका। सन्देशं खल्वहं मन्त्रये।)

गणिका- उट्ठेहि उट्ठेहि। कुसन्देसं असूआमि, ण तुवं। (उत्तिष्ठोत्तिष्ठ। कुसन्देशमसूयामि, न त्वाम्।)

चेटी- किं अहं अत्तं भणामि। (किमहमम्बां भणामि।)

गणिका- भणेहि अत्तं - जदा अय्यचारुदत्तो अभिसारइदव्वो तदा मण्डेमित्ति। (भणाम्बां- यदार्यचारुदत्तोऽभिसारयितव्यस्तदा मण्डयामीति।)

चेटी- तह। (निष्क्रान्ता।) (तथा।)

(ततः प्रविशति सज्जलकः।)

सज्जलकः- कृत्वा निशायां वचनीयदोषं
निद्रां च हित्वा तिमिरं भयं च।
स एव सूर्योदयमन्दवीर्यः
शनैर्दिवाचन्द्र इवास्मि भीतः ।। १ ।।

दिष्ट्या कर्मान्ते प्रभातम्। यावदिदानीं वसन्तसेनायाः परिचारिकाया मदनिकाया निष्क्रयार्थं मयेदं कृतम्। (परिक्रम्य) इदं वसन्तसेनाया गृहम्। यावत् प्रविशामि। (प्रविश्य) किन्नु खल्वभ्यन्तरस्था मदनिका। अथवा, पूर्वाहणे गणिकानामभ्यन्तरे सान्निध्यम्। अतस्तत्रैव तया भवितव्यम्। यावच्छब्दापयामि। मदनिके! मदनिके! ।

चेटी- (आकर्ण्य) सज्जळअस्स विअ सरो। वावुदा अज्जुआ। ता उवसप्पिस्सं। (उपगम्य) इअम्हि। (सज्जलकस्येव स्वरः। व्यापृताज्जुका। तदुपसर्पिष्यामि। इयमस्मि।)

सज्जलकः- इतस्तावत् ।

चेटी- किं तुवं सङ्किदवण्णो विअ। (किं त्वं शङ्कितवर्ण इव।)

सज्जलकः- न खलु, किञ्चित् कथयितुकामः।

गणिका- हञ्जे! इमं चित्तफळअं सअणीए ठावेहि। (विलोक्य) कहिं गआहदासा। अहव अदूरगआए होदव्वं। जाव णं पेक्खिस्सं। (परिक्रम्यावलोक्य) अम्मो इअं सा अदिसिणिद्धाए दिठ्ठीए केण वि मणुस्सेण पिबन्ती विअ सह मन्तअन्ती चिट्ठइ। तक्केमि एसो जो कोवि कएण मं याचेदि। (हञ्जे! इदं चित्रफलकं शयनीये स्थापय। कुत्र गता हताशा। अथवा अदूरगतया भवितव्यम्। यावदेना प्रेक्षिष्ये। अम्मो इयं साऽतिस्निग्धया दृष्ट्या केनापि मनुष्येण पिबन्तीव सह मन्त्रयमाणा तिष्ठति। तर्कयाम्येष यः कोऽपि क्रयेण मां याचते।)

सज्जलकः- श्रूयतां रहस्यम्।

गणिका- अजुत्तं पररहस्सं सोदुं, अहं गमिस्सं। (अयुक्तं पररहस्यं श्रोतुम् अहं गमिष्यामि।)

सज्जलकः- अपि वसन्तसेना (इत्यर्धोक्ते)।

गणिका- अहं अहिइदा एदाअं कहाअं। होदु, सुणिस्सम् दाव भविस्सदि। (पुनः प्रतिनिवृत्य स्थिता।) (अहमधिकृतैतस्यां कथायाम्। भवतु, श्रोष्यामि तावद् भविष्यति।)

सज्जलकः- किं दास्यति त्वां निष्क्रयेण।

गणिका- सो एव्व एसो। होदु, सुणिस्सं। (स एवैषः। भवतु, श्रोष्यामि।)

चेटी- सज्जळअ! मम पदाणं पुढमं एव अज्जुआए उत्तं। (सज्जलक! मम प्रदानं प्रथममेवाज्जुकयोक्तम्।)

सज्जलकः- तेन हीममस्यै प्रयच्छ, एवं वक्तव्या च-

अयं तव शरीरस्य प्रमाणादिव निर्मितः।
अप्रकाश्यो ह्यलङ्कारो मत्स्नेहाद् धार्यतामिति ।। २ ।।

चेटी- पेक्खामि दाव। (पश्यामि तावत्।)

सज्जलकः- गृह्यताम्। (दर्शयति।)

चेटी- दिट्ठपुरुवो विअ अअं अळङ्कारो। (दृष्टपूर्व इवायमलङ्कारः।)

गणिका- ममकेरओ विअ अअं अळङ्कारो। (मदीय इवायमलङ्कारः।)

चेटी- भणाहि भणाहि। को इमस्स आअमो। (भण भण। कोऽस्यागमः।)

सज्जलकः- त्वत्सनेहात् साहसं कृतम्।

उभे- ह्, साहसिओ। (हं साहसिकः।)

चेटी- (आत्मगतम्) आ, अज्जुआए खु अमस्स आइदी कम्मदारुणदाए उव्वे अणीआ संवुत्ता। (प्रकाशम्) हद्धि मम किदे उभअं संसइदं संवुत्तं-तव सरीरं चारित च। (आ, अज्जुकायाः खल्वस्याकृतिः कर्मदारुणतयोद्वेजनीया संवृत्ता। हा धिग् मम कृते उभयं संशयितं संवृत्तं- तव शरीरं चारित्रं च।)

सज्जलकः- उन्मत्तिके! साहसे खलु श्रीर्वसति।

चेटी- अपण्डिदो खु सि। को हि णाम जीविदेण सरीरं विक्कीणिस्सदि। अह कस्स गेहे इअं विस्सासवञ्चणा किदा। (अपण्डितः खल्वसि। को हि नाम जीवितेन शरीरं विक्रेष्यति। अथ कस्य गेहे इयं विश्वासवञ्चना कृता।)

सज्जलकंः- यथा प्रभाते मया श्रुतं - श्रेष्ठिचत्वरे प्रतिवसति सार्थवाहपुत्रश्चारुदत्तो नाम।

उभे- हुम्।

सज्जलकः- अयि,

विषादस्रस्तसर्वाङ्गी सम्भ्रमोत्फुल्ललोचना।
मृगीव शरविद्धाङ्गी कम्पसे चानुकम्पसे ।। ३ ।।

चेटी- सच्चं भणाहि। सत्थवाहकुळे साहसं करन्तेण तुए कोच्चि कुळवुत्तो सत्थेण अत्थि परिक्खदो वावादिदो वा। (सत्यं भण। सार्थवाहकुले साहसं कुर्वता त्वया कश्चित् कुलपुत्रः शस्त्रेणास्ति परिक्षतो व्यापादितो वा।)

गणिका- सुट्ठु, मए वि पुच्छिदव्वं एदाए पुच्छिदं। (सुष्ठु, मयापि प्रष्टव्यमेतया पृष्टम्।)

सज्जलकः- मदनिके! एतावत् किं न पर्याप्तं, द्वितीयमप्यकार्यं करिष्यामि। न खल्वत्र शस्त्रेण कश्चित् परिक्षतो व्यापादितो वा।

चेटी- सज्जळअ! सच्चं। (सज्जलक! सत्यम्।)

सज्जलकः- सत्यम्।

चेटी- साहु सज्जळअ! पिअं मे। (साधु सज्जलक! प्रियं मे।)

सज्जलकः- किं किं प्रियमित्याह। ईदृशं मदनिके!

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्यं
सन्तुष्टपूर्वपुरुषेऽपि कुले प्रसूतः।

रक्षामि मन्मथगृहीतमिदं शरीरं
मित्रं च मां व्यपदिशस्यपरं च यासि ।। ४ ।।

चेटी- सज्जळअ! सुणाहि । अज्जुआए अअं अळङ्कारो। (कर्णे।) एवं विअ। (सज्जलक! श्रृणु। अज्जुकाया अयमलङ्कारः। एव मिव।)

सज्जलकः- एवम्।

आज्ञानाद् या मया पूर्वं शाखा पत्रैर्वियोजिता।
छायार्थी ग्रीष्मसन्तप्तस्तामेव पुनराश्रितः ।। ५ ।।

गणिका- सन्तप्पदि त्ति तक्केमि एदेण अकय्यं किदं ति। (संतप्यत इति तर्कयामि एतेनाकार्यं कृतमिति।)

सज्जलकः- मदनिके! एवं-गते किं कर्तव्यम् ।

चेटी- तहिं एव णिय्यादेहि, णहि मण्डइस्सदि अज्जुआ। (तत्रैव निर्यातय, नहि मण्डयिष्यत्यज्जुका।)

सज्जलकः- अथेदानीं सोऽमर्षान्मां चोर इति रक्षिपुरुषैर्ग्राहयिष्यति चेदत्र किं करिष्यामि।

चेटी- मा भाआहि मा भाआहि। कुळवुत्तो खु सो गुणाणं परितुस्सदि। (मा बिभीहि मा बिभीहि। कुलपुत्रः खलु स गुणानां परितुष्यसि।)

गणिकाः- साहु भद्दे! अवत्तव्वासि, अळङ्किदा विअ एदेण वअणेण। (साधु भद्रे! अव्यक्तव्यासि, अलङ्कृतेवैतेन वचनेन।)

सज्जलकः- सर्वथा न शक्ष्याम्यहं तत्र गन्तुम्।

चेटी- अअं अण्णो उवाओ। (अयमन्य उपायः।)

गणिका- एदे गुणा वेसवासस्स। (एते गुणा वेशवासस्य।)

सज्जलकः- कोऽन्य उपायः।

चेटी- णं तव रूपञ्ञा अज्जुआ अवि सत्थवाहपुत्तो अ। (ननु तव रूपज्ञाऽज्जुकापि सार्थवाहपुत्रश्च।)

सज्जलकः- न खलु।

चेटी- तेण हि इमं दाव अळङ्कारं तस्स सत्थवाहपुत्तस्स वअणादो अज्जुआए णिय्यादेहि। एवं च किदे तुवं रक्खिदो, सो अय्यो अ अमिव्विण्णो भविस्सदि। अहं च पीडिदा ण भविस्सं। आदु अज्जुअं च पुणो वञ्चिअ पुणो एव्व दासभावो भवे। (तेन हीमं तावदलङ्कारं तस्य सार्थवाहपुत्रस्य वचनादज्जुकायै निर्यातय। एवं च कृते त्वं रक्षितः, स आर्यश्चानिर्विण्णो भविष्यति। अहं च पीडिता न भविष्यामि। अथवा अज्जुकां च पुनर्वञ्चयित्वा पुनरेव दासभावो भवेत्।)

सज्जलकः- मदनिके! प्रीतोऽस्मि।

गणिका- भोदु, अब्भन्तरं पविसिअ उवविसामि। (तथा करोति।) (भवत्वभ्यन्तरं प्रविश्योपविशामि।)

चेटी- सज्जळअ! आअच्छ, कामदेवउळे मं पडिवाळेहि। अहं ओसरं जाणिअ अज्जुआए णिवेदेमि। (सज्जलक! आगच्छ, कामदेवकुले मां प्रतिपालय। अहमवसरं ज्ञात्वाज्जुकायै निवेदयामि।)

सज्जलकः- बाढम् । (निष्क्रान्ताः।)

चेटी- सुहं अज्जुआए। एसो सत्थवाहपुत्तस्स सआसादो कोच्चि बम्हणो आअदो अज्जुअं पेक्खिदुं। (सुखमज्जुकायाः। एष सार्थवाहपुत्रस्य सकाशात् कश्चिद् ब्राह्मण आगतोऽज्जुकां द्रष्टुम्।)

गणिका- (सादरम्) गच्छ, सिग्घं पवेसेहि णं। (गच्छं, शीघ्रं प्रवेशयैनम्।)

चेटीः- तह। (उपसृत्य) एदु एदु अय्यो। (तथा। एत्वेत्वार्यः।)

(प्रविश्य)

विदूषकः- (सर्वतो विलोक्य) अहो गणिआवाडस्स सस्सिरीअदा। णाणापट्टणसमागदेहि आअमिएहि पुत्थआ वाईअन्ति। संओजअन्ति अ आहारप्पआआराणि। वीणा वादीअन्ति। सुवण्णआरा अळङ्कारप्पआराणि आदरेण जोजअन्ति। (अहो गणिकावाटस्य सश्रीकता। नानापट्टणसमागतैरागमिकैः पुस्तकानि वाच्यन्ते। संयोज्यन्ते चाहारप्रकाराः वीणा वाद्यन्ते। सुवर्णकारा अलङ्कारप्रकारानादरेण योजयन्ति।)

चेटीः- एसा अज्जुआ। उवसप्पदु अय्यो । (एषाज्जुका। उपसर्पत्वार्यः।)

विदूषकः- (उपगम्य) सोत्थि होदीए । (स्वस्ति भवत्यै।)

गणिका- साअदं अय्यस्स। हञ्जे! आसणं अय्यस्स, पादोदअं च। (स्वागतमार्यस्य। हञ्जे! आसनमार्यस्य, पादोदकं च।)

विदूषकः- (आत्मगतम्) सव्वं आणेदु वज्जिअ भोअणं। (सर्वमानयतु वर्जयित्वा भोजनम्।)

चेटी- जं अज्जुआ आणवेदि। (आसनं ददाति पादोदकं च।) उवविसदु अय्यो। (यदज्जुकाज्ञापयति। उपविशत्वार्यः।)

विदूषकः- (उपविश्य) पडिच्छदु, आसणं भोदी। अहं किञ्चि भणिदुं, आअदो। (प्रतीच्छत्वासनं भवती। अहं किञ्चिद् भणितुमागतः।)

गणिका- (उपविश्य) अवहिदम्हि (अवहितास्मि)

विदूषकः- केत्तिअमत्तं खु तस्स अळङ्कारस्स मुळ्ळप्पमाणं। (कियन्मात्रं खलु तस्यालङ्कारस्य मूल्यप्रमाणम्।)

गणिका- किंणिमित्तं खु अय्यो पुच्छदि। (किन्निमित्तं खल्वार्य पृच्छति)

विदूषकः- सुणादु भोदी। तत्तहोदो चारुदत्तस्स गुणप्पच्चाअणणिमित्तं खु तुए अलङ्कारो तहिं णिक्खित्तो। सो तेण जूदे हारिदो। (शृणोतु भवति। तत्रभवतश्चारुदत्तस्य गुणप्रत्यायननिमित्तं खलु त्वयालङ्कारस्तस्मिन् निक्षिप्तः। स तेन द्यूते हारितः।)

गणिका- जूदे! जुज्जइ। तदो तदो। (द्यूते। युज्यते। ततस्ततः।)

विदूषकः- तदो तस्स अळङ्करस्स मुळ्ळभूदं इमं मुत्तावळिं पडिच्छदु भोदी। (ततस्तस्यालङ्कारस्य मूल्यभूतामिमां मुक्तावलीं प्रतीच्छतु भवती।)

गणिका- (आत्मगतम्) धिक् खु गणिआभावं। ळुद्धत्ति मं तुळ अदि। जइ ण पडिच्छे, सो एव्व दोसो भविस्सदि। (प्रकाशम्) आणेदु अय्यो। (धिक् खलु गणिकाभावम्। लुब्धेति मां तुलयति। यदि न प्रतिच्छामि, स एव दोषो भविष्यति। आनयत्वार्यः।)

विदूषकः- इदं गण्हदु भेदी। (इदं गृह्णातु भवती।)

गणिका- (गृहीत्वा) पडिच्छिदं तए त्ति अय्यो णिवेदेदु। (प्रतीष्टं तयेत्यार्यो निवेदयतु।)

विदूषकः- (आत्मगतम्) कोवि उवआरो वि ण एदाए भणिदो। (प्रकाशम्।) एवं होदु। (दत्त्वा निष्क्रान्तः।) (कोऽप्युपचारोऽपि नैतया भणितः। एवं भवतु।)

गणिका- साहु चारुदत्त! साहु। भाअधेअपरिवुत्तदाए दसाए माणावमाणं रक्खिदं। (साधु चारूदत्त! साधु! भागधेयपरिवृत्ततायां दशायां मानावमानं रक्षितम्।)

(प्रविश्य)

मदनिका- अज्जुए! सत्थवाहपुत्तस्स सआसादो कोच्चि मणुस्सो आअदो इच्छइ अज्जुअं पेक्खिउं। (अज्जुके! सार्थवाहपुत्रस्य सकाशात् कश्चिद् मनुष्य आगत इच्छत्यज्जुकां द्रष्टुम्।)

गणिका- किं दिट्ठपुरुवो णवदंसणो वा। (किं दृष्टपूर्वो नवदर्शनो वा।)

मदनिका- अज्जुए! णहि, तस्सकरेओ त्ति मे पडिभादि। (अज्जुके! नहि, तदीय इति मे प्रतिभाति।)

गणिका- गच्छ, पवेसेहि णं। (गच्छ, प्रवेशयैनम्।)

मदनिका- तह। (निष्क्रान्ता।) (तथा।)

गणिका- अहो रमणिज्जदा अज्ज दिवसस्स। (अहो रमणीयताऽद्य दिवसस्य।)

(ततः प्रविशति मदनिका सज्जलकेन सह।)

सज्जलकः- कष्टा खल्वात्मशङ्का नाम,

यः कश्चिच्चकितगतिर्निरीक्षते मां
सम्भ्रान्तो द्रुतमुपसर्पति स्थितो वा।
सर्वांस्तांस्तुलयति दोषतो मनो मे
स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ।। ६ ।।

मदनिका- एसा अज्जुआ। उवसप्पदु अय्यो। (एषाज्जुका। उपसर्पत्वार्यः।)

सज्जलकः- (उपसृत्य) सुखं भवत्यै।

गणिका- साअदं अय्यस्स। हढ्जे! आसणं देदु अय्यस्स। (स्वागतमार्यस्य। हञ्जे! आसनं दीयतामार्याय।)

सज्जलकः- भवतु भवतु। गृहीतमासनम्। त्वरिततरमनुष्ठेयं किञ्चित् कार्यमस्ति।

गणिका- एवं भणादु अय्यो। (एवं, भणत्वार्यः।)

सज्जलकः- आर्यचारुदत्तेनास्मि प्रेषितः-यस्तावदलङ्कारो मम हस्ते निक्षिप्तः, स त्वसम्भोगमलिनतया गृहस्यासान्निध्यात् कौडुम्बिकानां दुरारक्षः। तद् गृह्यताम् इति।

गणिका- इमं तस्स चारुदत्तस्य देदु अय्यो। (इमं तस्मै चारुदत्ताय ददात्वार्यः।)

सज्जलकः- भवति! न खल्वहं गच्छामि।

गणिका- अहं जाणामि तस्स गेहे साहसं करिअ आणीदो अअं अळङ्कारो। तस्स गुणाणि अणुकम्पेदु अय्यो। (अहं जानामि तस्य गेहे साहसं कृत्वानीतोऽयमलङ्कारः। तस्य गुणाननुकम्पतामार्यः।)

सज्जलकः- (आत्मगतम्) कथं विदितोऽसम्यनया।

गणिका- को एत्थ, पवहणं दाव अय्यस्स। (कोऽत्र, प्रवहणं तावदार्यस्य।)

मदनिका- णेमिसद्दो विअ सुणीअदि। आअदेण पवहणेण होदव्वं (नेमिशब्द इव श्रूयते। आगतेन प्रवहणेन भवितव्यम्।)

गणिका- (स्वैराभरणैर्मदनिकामलङ्कृत्य आरुहदगु अय्यो अय्याए सह पवहणं। (आरोहत्वार्य आर्यया सह प्रवहणम्।)

मदंनिका- अज्जुए! किं एदं। (अज्जुके! किमेतत्)

गणिका- मा खु मा खु एवं मन्तिअ। अय्या खु सि दाणिं संवुत्ता। गण्हदु अय्यो। (मदनिकां गृहीत्वा सज्जलकाय प्रयच्छति।) (मा खलु मा खल्वेवं मन्त्रयित्वा। आर्या खल्वसीदानीं संवृत्ता। गृह्णात्वार्यः।)

सज्जलकः- (आत्मगतम्) भोषः! कदा खल्वस्याः प्रतिकर्तव्यं भविष्यति। अथवा, शान्तं शान्तं पापम्।

नरः प्रत्युपकारार्थि विपत्तौ लभते फलम्।
द्विषतामेव कालोऽस्तु योऽस्या भवतु तस्य वा ।। ७ ।।

(तया सह निष्क्रान्तः सज्जलकः।)

गणिका- चउरिए! (चतुरिके!)

(प्रविश्य)

चेटी- अज्जुए! इअम्हि। (अज्जुके! इयमस्मि।)

गणिका- हञ्जे! पेक्ख जागरन्तीए मए सिविणो दिट्ठो एवं। (हञ्ज! पश्य जाग्रत्या मया स्वप्नो दृष्टः एवम्।)

चेटी- पिअं मे, अमुदंकणाडअं संवुत्तं। (प्रियं मे, अमृताङ्कनाटकं संवृत्तम्।)

गणिका- एहि इमं अळङ्कारं गणिहअ अय्यचारुदत्त अभिसारिस्सामो। (एहीममलङ्काकारं गृहीत्वार्यचारुदत्तमभिसरिष्यावः।)

चेटी- अज्जुए! तह। एदं पुण अभिसारिआसहाअभूदं दुद्दिणं उण्णमिदं। (अज्जुके! तथा। एतत् पुनरभिसारिकासहायभूतं दुर्दिनमुन्नमितम्।)

गणिका- हदासे! मा हु वड्ढावेहि। (हताशे! मा खलु वर्धय।)

चेटी- एदु एदु अज्जुआ। (एत्वेत्वज्जुका।)

(निष्क्रान्ते।)

चतुर्थोऽङ्कः।

समाप्तमिदम नाटकं